

प्रकाशिका - २४
Prakashika - 24

# नाट्यप्रदीप

सुन्दरमिश्र कृत

सम्पादक
राधावल्लभ त्रिपाठी

राष्ट्रीय पाण्डुलिपि मिशन
॥ विज्ञानमुपास्व ॥
National Mission for Manuscripts

Prakashika Series
No. 24

*General Editor*

**Kanwar Sameer Lather**
Director
Ministry of Culture
Government of India

# Nāṭyapradīpa

of

## Sundaramiśra

*Edited by*

**Radhavallabh Tripathi**

National Mission for Manuscripts

NATIONAL MISSION FOR MANUSCRIPTS
New Delhi

and

PRINTWORLD

Publishers of Indian Traditions

**Cataloging in Publication Data — DK**
[Courtesy: D.K. Agencies (P) Ltd. <docinfo@dkagencies.com>]

**Sundaramiśra,** active 16th century-17th century, **author.**
Nāṭyapradīpa of Sundaramiśra / edited by Radhavallabh Tripathi.
pages cm — (Prakashika series ; no. 24)
In Sanskrit.
ISBN: 9789380829364
ISBN: 9789380829029 (series)

1. Sanskrit drama - History and criticism. 2. Theater - India. I. Tripathi, Radhavallabh, 1949-, editor. II. Title.

DDC 891.2209 23

**ISNN: 978-93-80829-36-4**
**ISBN: 978-93-80829-02-9 (series)**
*First published in India, 2015*
© National Mission for Manuscripts, New Delhi.

All rights reserved. No part of this publication may be reproduced or transmitted in any form or by any means, electronic or mechanical, including photocopying, recording or any information storage or retrieval system, without prior written permission of both the copyright owner, indicated above, and the publisher.

*Published by:*
**National Mission for Manuscripts**
No. 11 Mansingh Road
New Delhi - 110 001
*Phone:* (011) 2338 3894; *Fax:* 2307 3340
*E-mail:* director.namami@nic.in
*Website:* www.namami.nic.in

*Co-published by:*
**D.K. Printworld (P) Ltd**
*Regd. Office: Vedaśrī,* F-395, Sudarshan Park
(Metro Station: Ramesh Nagar), New Delhi-110 015
*Phones:* (011) 2545 3975; 2546 6019; Fax: (011) 2546 5926
*E-mail:* indology@dkprintworld.com
*Website:* www.dkprintworld.com

*Printed by:* D.K. Printworld (P) Ltd., New Delhi.

# Foreword

THE seventeenth-century *Nāṭyapradīpa* of Sundaramiśra which is a fine specimen of the uninterrupted tradition of Bharata's *Nāṭyaśāstra* is one of the most important and comprehensive works on dramaturgy (*nāṭya*) of that period. In this monumental work Sundaramiśra covers all aspects of drama, including in-depth study of forms, structures and definitions relating to drama. Sundaramiśra's novel interpretations, new definitions and detailed analysis of various plays are interesting and thought provoking. He effectively uses examples from various well-known plays including his own play *Abhirāmamaṇi*. On the whole Sundaramiśra's *Nāṭyapradīpa* captures many aspects of dramaturgy which are key to a student's learning of drama and his understanding of *Nāṭyaśāstra*.

It is for the first time that an attempt has been made to prepare a critical edition of this unpublished work by Prof. Radhavallabh Tripathi on the basis of two rare manuscripts. Prof. Tripathi's scholastic handling of the critical edition has resulted in a brilliant analysis of *Nāṭyapradīpa*. No one else could possibly have presented this better. In his elaborate introduction to the critical edition, Prof. Tripathi extensively explains how the author of *Nāṭyapradīpa* brings to the fore the correlation between the theory and practice of Sanskrit drama.

The National Mission for Manuscripts is pleased to present to the scholarly world this critical edition and we are sure scholars and students of Sanskrit drama will find this work of immense interest to them.

*14 August 2015*

**Dr Sanghamitra Basu**
Coordinator, Research & Publication
National Mission for Manuscripts
New Delhi

# Abbreviations

| | |
|---|---|
| BP | *Bhāvaprakāśa* of Śāradātanaya |
| DR | *Daśarūpaka* of Dhanañjaya |
| FN | Footnote |
| NP | *Nāṭyapradīpa* |
| NŚ | *Nāṭyaśāstra* of Bharatamuni |
| SD | *Sāhityadarpaṇa* of Viśvanātha |

# Contents


| | | |
|---|---|---|
| | *Foreword* | v |
| | *Abbreviations* | vi |
| | *Scheme of Transliteration* | viii |
| | *Introduction* | ix |
| | *Specimen of Folios of Manuscripts A and B* | xxiii |
| 1. | नाट्यप्रदीपः सुन्दरमिश्रविरचितः | 1 |
| | *Index of Authors and Works Cited* | 63 |
| | *Index of Technical Terms* | 65 |

# Scheme of Transliteration

**Vowels**

| | | | | | | |
|---|---|---|---|---|---|---|
| अ (a) | आ (ā) | इ (i) | ई (ī) | उ (u) | ऊ (ū) | |
| ऋ (ṛ) | ॠ (ṝ) | ऌ (ḷ) | ए (e) | ऐ (ai) | ओ (o) | औ (au) |

**Consonants**

| | | | | |
|---|---|---|---|---|
| क (ka) | ख (kha) | ग (ga) | घ (gha) | ङ (ṅa) |
| च (ca) | छ (cha) | ज (ja) | झ (jha) | ञ (ña) |
| ट (ṭa) | ठ (ṭha) | ड (ḍa) | ढ (ḍha) | ण (ṇa) |
| त (ta) | थ (tha) | द (da) | ध (dha) | न (na) |
| प (pa) | फ (pha) | ब (ba) | भ (bha) | म (ma) |

**Semi Vowels**

| | | | | |
|---|---|---|---|---|
| य (ya) | र (ra) | ल (la) | व (va) | ळ (ḻa) |

**Sibilants**

| | | |
|---|---|---|
| श (śa) | ष (ṣa) | स (sa) |

**Aspirate**

ह (ha)

**Anusvāra and Visarga**

ं (ṁ/ṃ) : (ḥ)

**Ānunāsika**

ँ (~) e.g. अँ (ã) आँ (ā̃)

# Introduction

*Nāṭyapradīpa* (NP) is being published for the first time in a critical edition. It is an original work on the principles of dramaturgy. The author Sundaramiśra, flourished in sixteenth-seventeenth century. Besides the *Nāṭyapradīpa*, he had also written a play *Abhirāmamaṇi* on *Rāmāyaṇa*-theme. This play is not available. It was composed before Sundaramiśra took up writing the *Nāṭyapradīpa*. V. Raghavan in his "Some Lost Rama Plays" does not refer to this lost Rāma-play.

No other information is available about Sundaramiśra. Rāghvabhaṭṭa, a well-known commentator, cites the view of Sundaramiśra on *Nāndī* in his *Arthadyotanikā* — a masterpiece as a commentary of the *Abhijñānaśākuntalam* of Kālidāsa. On the other hand, Sundaramiśra refers to Rāghavabhaṭṭa and severely criticizes him for his analysis of the plot of Kālidādsa's play. He must have been therefore a senior contemporary to Rāghavabhaṭṭa.

For the definitions of various categories related to drama, Sundaramiśra largely draws from the *Nāṭyaśāstra* (NŚ), the *Daśarūpaka* (DR) of Dhanañjaya and the *Sāhityadarpaṇa* (SD) of Viśvanātha. He mostly reproduces these texts without acknowledging the source. His contribution to Sanskrit dramaturgy lies in his practical criticism of several Classical Sanskrit plays and also in applying the whole theoretical framework of dramaturgy to his own play *Abhirāmamaṇi*.

**Manuscript Material**

Only two manuscripts of *Nāṭyapradīpa* are available.

**Ms. A:** The ms. (no. 41618) in Sampurnanand Sanskrit University library. It has 52 folios in the size of 9.2" X 4.2" written in Devanāgarī. Each page has eight lines, and each line has around 30 syllables. It was copied

in VS 1872 (CE 1815). The owner of the ms. is Piśunharā Dayānātha Nāgar Vyās. As per remarks on the first folio of the ms., he purchased it at the cost of one rupee on the seventh day of black fortnight in the month of Āṣāḍhaṇ in VS 1972 (CE 1915) from Prem Narayan Tiwadi (Tiwari). It seems that the copyist scribed his own propitiatory verse on the back of title page, and the above remarks in a different handwriting, were obviously added afterwards by the owner of the Ms. below the verse written by the copyist.[1] The colophon of this ms. reads as under:

इति श्री सुन्दरराजमिश्रविरचितो नाट्यप्रदीपं (?) समाप्तिमगमत्।
श्रीरस्तु।

**Ms. B:** As per information given in the *New Catalogus Catalogorum* (vol. 10, p. 25), one ms. of NP is listed with the India Office Library in London vide Acc. No. 1199 1200. The ms. along with another ms. of NP was been shifted to British Library some four years back. The other manuscript noted in the catalogue as "perhaps the author's own copy" has reportedly been lost.[2]

The ms. bears the seal of E.I. Company (East India Company) on its cover, there was an accession no. in the centre of the seal which is illegible. This ms. has 35 folios with eleven lines in each page. It is in good condition. But it is very carelessly copied and is full of errors. The Colophon of the ms. reads:

इति श्रीसुन्दरमिश्रविरचितो नाट्यप्रदीपः। श्रीरस्तु। श्रीरामार्पणमस्तु।
करकृतमपराधं क्षन्तुमर्हन्ति . . .

The back of the folio is missing in the copy provided by the British Library.

## Date of Nāṭyapradīpa

From one of the last stanzas of *Nāṭyapradīpa* as given in both the manuscripts, it is learnt that the work was completed in Śaka year

---

1 व्यासोपाख्यनागरत्वव्याप्यजातीयपिशुनहरा दयानाथस्येदम, प्रेमनारायणतिवाडीसु १) रुपया एक दे के लीया मिती अषढ वदि ७ गुरुवार संवत् १९७२.

2 These facts are based on the information gathered by Prof. Nanavati during his visit to the British Library in 2013.

1535 (CE 1613).[3] The *Catalogus Catalogorum* I.285 refers to *Nāṭyapradīpa* and confirms this date of its composition.

**An Overview of the Text**

Sundaramiśra composed this text to simplify and present the principles of dramaturgy in nutshell, so that those who are not adept in the theory and practice of Sanskrit drama can grasp the basic tenets of the Śāstra. But he covered those several topics also which were omitted by his predecessors like Dhanañjaya and Viśvanātha. At the very outset of this treatise, he explains the purpose of writing a new text on Dramaturgy:

मालसानलसशीलशालिनां दक्षतातिजडताजुषां कृते।
नाटकप्रकृतिरूपलक्षणं सङ्क्षिपामि निजनव्यलक्षणम्॥२॥

The unique quality of this text lies in its comprehensive nature, it covers all the topics of dramaturgy and with an all encompassing range and inclusivity and also evinces a sound understanding of structure of Sanskrit drama.

*Nāṭyapradīpa* deals with the following topics: *Pūrvaraṅga* (the preliminaries), *nāndī* (propitiatory verse), *prastāvanā* or *āmukha* (prologue), *pañcasandhis* (five junctures) and their sixty-four constituents, five *avasthās*, five *arthaprakṛtis* (natures of plot), *patākāsthānakas*, *nāṭyālaṁkāras*, twenty-one *anusandhis*, *lāsyāṅgas*, *daśarūpaka* (ten major types of drama) together with three minor forms — *nāṭikā*, *saṭṭaka*, and *troṭaka*.

The Uniqueness of this text also lies in its exposition of 36 *lakṣaṇas* (characteristics of poetry or drama), an important category in Bharata's system which the later authors have generally omitted. There are two recensions in the *Nāṭyaśāstra* with regard to the treatment of *kāvya-lakṣaṇa*. They can be categorized as the Anuṣṭup-tradition and the Upajāti-tradition. Sundaramiśra adheres to the Anuṣṭup-tradition for definition of the 36 *lakṣaṇas*.

---

[3] शाके शरग्रामशरेन्दुतुल्ये (१५३५)
ग्रामे वरिष्ठाश्रमतः प्रसिद्धे।
तदेतदौजागरिणा निबद्धं
मुदा कवीनां कविसुन्दरेण।

Sundaramiśra frankly criticizes such stalwarts like Dhanika and offers novel interpretations on many subjects. Besides Bharata, he also cites Mātṛgupta, Dhanika, Abhinavagupta and Viśvanātha (the author of *Sāhityadarpaṇa*) and disagrees with such a great commentator like Rāghavabhaṭṭa on identification of *patākā* and *prakarī* (varieties of sub-plot) in *Abhijñānaśākuntalam*. For definitions he mostly depends on Bharata and Dhanañjaya. But *Nāṭyapradīpa* is a unique text offering practical criticism of about a dozen Sanskrit plays on the basis of various categories and precepts of dramaturgy. It simultaneously analyses the structure of the classics like *Mudrārākṣasa, Śākuntala, Vikramorvaśīyam, Mālavikāgnimitram, Veṇīsaṁhāra* and *Ratnāvalī*. Many other plays like *Svapnavāsavadattam, Mālatīmādhavam, Kundamālā, Udāttarāghavam* and *Pāṇḍavānandam* are also taken up for reference and confirmation of definitions and theories. Of these, the last two are not available. *Nāṭyapradīpa* is thus one of the richest store-houses of references to several Sanskrit plays amongst the texts on Sanskrit dramaturgy. It not only brings out the erudition of Sundaramiśra, but also establishes the fact that the study and performances of these plays were in vogue during the sixteenth and the seventeenth century CE. Sundaramiśra has however kept the focus on his own play *Abhirāmamaṇi* and *Nāṭyapradīpa* can be said to be the only source for the reconstruction of this play, which has otherwise been lost. A master of theories of dramaturgy, Sundaramiśra offers novel interpretations or his own views on performance traditions and various dramatic concepts.

### Sundaramiśra on the Performance of Nāndī

In the extensive discussion on *nāndī*, Sundaramiśra also specifies the articles that should be used on the stage with the performance of *nāndī*. These are — *dūrvā* (auspicious grass), *kalaśa* (a pitcher), flowers and *chatra* (umbrella),[4] but adds that their employment is not mandatory. So also, dropping hints about the theme of the play through *nāndī* is not compulsory, because neither Bharatamuni prescribes it nor it is an invariable practice on theatre. He determines *kāvyārthasūcana* (hinting upon on the theme of the play to be performed) as *prāyika* (to

[4] मङ्गल्यं दूर्वाकलशकुसुमछत्रादि ।

be generally practised but not compulsory). However, he suggests that the performance will become much more spectacular if *kāvyārthasūcana* is also made a part of *nāndī*-presentation.[5] *Nāndī* may comprise eight, ten, twelve or sixteen *padas*. There is very interesting discussion of the connotation of the word *pada* in the adjectives *aṣṭapadā, dvādaśapadā,* etc. Besides Bharata and Dhanañjaya, Sundaramiśra here quotes Mātṛgupta's view also[6] on *Nāndī.*

Various interpretations are offered with regards to *pada* in *nāndī,* viz.:

1. *pada* denotes a word to be used in the sentence
2. *pada* is a quarter of a verse
3. *pada* is half of a verse

Sundaramiśra makes a brilliant analysis of *nāndī* by profusely quoting the *Naṭyaśāstra* of Bharata and also by citing views of savants like Mātṛgupta and Dhanika. He justifies *ṣaṭpadā nāndī* in *Veṇīsamhāra* and cites the *nāndī*s of *Mālavikāgnimitram* and *Ratnāvalī* also.[7]

He upholds the theory of two *sūtradhāras* establishing the second *sūtradhāra* as *sthāpaka,* but also allows the possibility that the use of the term *sūtradhāra* for *sthāpaka* may be indicative.[8] He also holds that

---

5 नान्द्यां मङ्गल्यशङ्खचन्द्राब्जाद्यान्यतमग्रहणं काव्यार्थसूचनं प्रायिकं भरतेनानुक्तत्वा-ल्लक्ष्येष्वनियमाच्च। काव्यार्थसूचने परं चमत्कारातिशयः।।

6 अस्य व्याख्याने मातृगुप्ताचार्यैः षोडशादिपदान्वितापीयमुदाहृता।।

7 श्लोकपादं पदं केचित्सुप्तिङन्तमथापरे । परेऽवान्तरवाक्यं च पदमाहुर्विशारदाः।।

8 भरते नान्द्यवसरे स्थापकाप्रवेशान्नान्दीपाठः प्रथमसूत्रधारस्यैव। । पुनर्भरतः -

त्र्यरुां वा चतुररुां वा शुद्धं चित्रमथापि वा।
प्रयुज्य रङ्गं निष्क्रामेत् सूत्रधारः सहानुगः।।

स्थापकः प्रविशेत् तत्र सूत्रधारगुणाकृतिः।
अत्यन्तमधुरैः श्लोकैर्नानाभावसमन्वितैः।
प्रसाद्य रङ्गं विधिवत् कवेर्नाम च कीर्तयेत्।।

अत्रापि भरतानुक्तत्वात् काव्यार्थसूचनं प्रायिकम्। ग्रन्थान्तरे -

अथोपादाय मधुरान् श्लोकान् काव्यार्थसूचकान्।
ऋतुं च कञ्चित् प्रायेण भारतीं वृत्तिमाश्रयेत्।।

प्रायेणेत्युपादानात् मधुरश्लोकोपादानं ऋतूपादानं च प्रायिकम्। प्रथमसूत्रधारस्य →

besides the recitation of *nāndī*, the *sthāpaka* may recite one or two sweet verses (*madhura ślokas*) also, apart from *nāndī*. He also allows the alternative that only one actor can function both as *sūtradhāra* and *sthāpaka* and he may recite both *nāndī* and *madhura śloka*. The *madhura ślokas* may either be combined with or be separated from the *nāndī*.[9]

If the alternative of *nāndī* combined with the *madhura śloka* is taken for granted, then the question would arise — why the existing scripts of many of the Sanskrit plays have a *nāndī* verse in the beginning apart from the *madhura ślokas*? Sundaramiśra provides a suitable answer here. He says that the abrupt beginning with the directive *nāndyante tataḥ praviśati sūtradhāraḥ* would be inauspicious, therefore a verse is prefixed with it. He also holds that references to lotus or moon in *nāndī* verses enhances their charm and cites the *nāndī* of his own play *Abhirāmanaṇi* for example. The *sthāpaka* should also perform the *prarocanā* which is attracting the audience towards the theme of the play through beautiful descriptions of seasons like spring, etc. Here also Sundaramiśra cites the example of his own play.[10] He justifies the elimination of items like

---

← विनिर्गतत्वात् प्रकरणाच्च भरते मधुरश्लोकपाठः स्थापकस्यैव। नान्दीपाठो मधुरश्लोकपाठश्च लक्ष्ये क्वचिदुभयं क्वचिदेकम्। यथा वेणीसंहारे - नान्द्यन्ते
श्रणाञ्जलिपुटपेयं विरचितवान् भारताख्यममृतं यः।
तमहमरागमकृष्णं कृष्णद्वैपायनं वन्दे।।

प्रस्तुतभारतकथासूचके प्रस्तुतो भारतकर्तृव्यासवन्दनार्थो मधुरश्लोकोऽपि। एवं मालविकाग्निमित्रादौ। एवं सिद्धे नान्द्यन्ते सूत्रधार इत्यस्यायमर्थः - प्रथमसूत्रधारपठिताया नान्द्या अन्ते प्रथमस्य विनिर्गतत्वाद् द्वितीयसूत्रधारः स्थापकः प्रविशति वदति च।

....यद्वा सूत्रधारपदं स्थापके लाक्षणिकम्। यथा पञ्चावयववाक्ये धूमज्ञानादिति वक्तव्ये। सम्प्रदायानुरोधाद् धूमादित्येव नियमेन लाक्षणिकपदप्रयोगः।

9 द्वितीयस्तु ग्रन्थानन्तर्गतात्यन्तावश्यकप्रथमसूत्रधारपठितनान्द्या अन्ते सूत्रधारः स्थापकः आदित एव मधुरश्लोकादिकं वदतीति धनिकस्यायमेवार्थः सम्मतः। यत्स रङ्गं प्रसाद्य मधुरैः श्लोकैः काव्यार्थसूचकैः। ऋतुं कञ्चिदुपादाय भारतीं वृत्तिमाश्रयेत् - इत्यस्य व्याख्याने - औत्सुक्येन कृतत्वरेत्यादि नान्दीस्थरत्नावलीश्लोकान् मधुरश्लोकत्वेनैव समुदाहृतवान्।

10 स्थापकेन प्ररोचना विधेया। लक्षणं त्वस्याः
उन्मुखीकरणं तत्र प्रशंसातः प्ररोचना।

कविसभ्यनटनाटकादीनां प्रस्तुतार्थानां प्रशंसनेन श्रोतॄणां प्रवृत्त्युन्मुखीकरणं प्ररोचना।
→

*pratyāhāra, avataraṇa, ārambha, utthāpana,* etc. from the performance of *pūrvaraṅga* on the basis of the use of the word *nityam* in the definition of *nāndī* in Bharata's *Nāṭyaśāstra.* His analysis of *āmukha* or *prastāvanā* is equally important.

**Novel Interpretations and New Definitions**

Following Viśvanātha's *Sāhityadarpaṇa,* Sundaramiśra defines *patākā* as *vyāpi prāsaṅgikavṛtta* (pervasive sub-plot). He also considers Bharata's theory that *patākā* is exhausted with *garbha* or *vimarśa sandhis* and gives a new interpretation to hold the continuity of *patākā* — the cycle of events ensued with *patākā* may wind up with the two *sandhis* — *garbha* or *vimarśa* — but its repercussions continue and they fructify with the end of the play. Sundaramiśra cites the view of Abhinavagupta to support his contention.[11]

He has also presented a genuine view of the concept of *arthalābha* in a play which incorporates a wide range of achievements and gains by the characters of a play.[12]

Sundaramiśra has given a brilliant analysis of *bindu,* one of the constituents of the nature of plot (*arthaprakṛti*). By presenting the sequences and developments of incidents from a number of plays, he shows how the drop (*bindu*) expands to make the vast canvass of the story and unfolds a panorama. In a detailed exposition from his own play, he established how *bindu* re-appears and then expands in each and every act.

Above all, Sundaramiśra has made a unique proposition with regard to the *aṅgāṅgī bhāva* (relationship of dominance and subsidiary) of *rasas* in a drama. From Bharata to his times, the accepted theory provides

---

← यथा प्रकृते अभिराममणौ - अद्य खलु सुरासुरेत्यादिना कथयन्तु चिन्ताया कारणमार्य इत्यन्तेन। अग्रे रामप्रवेशावसरेऽभिनेयवसन्तोल्लेखात् सामान्यपरमेवेति पदं वसन्तपरमेव। ऋतुनिर्देशोऽप्यत्र।

11 निर्वहणपर्यन्तमपि पताकायाः प्रवृत्तिदर्शनादिति व्याख्यातमभिनवगुप्तपादैः।

12 अर्थपदेन मात्रधर्मकामातिरिक्तं सुखसाधनं गृह्यते - तेन कीर्ति-जय-राज्यचाणक्य-शिखाबन्धनद्रौपदीकेशसंयमनचक्रवर्तीपुत्रप्रबोधचन्द्रोदयादयो ह्यर्थास्तत्र तत्रोक्ताः सङ्गच्छन्ते।

for the dominance of either Vīra or Śṛṅgāra *rasa* in the *nāṭaka* type of drama. Sundaramiśra establishes that Śṛṅgāra *rasa* is *aṅgī* or main *rasa* in his play, but Vīra simply cannot be called an *aṅga*. Thus emerges the theory of joint-dominance of two *rasas* in a play.

## Sundaramiśra and Rāghavabhaṭṭa

Sundaramiśra rightly corrects Rāghavabhaṭṭa for saying that the episode of Mātali in the *Abhijñānaśākuntalam* of Kālidāsa cannot be regarded as an example of *prakarī*.[13]

On the other hand, Rāghavabhaṭṭa has recognized the importance of *Nāṭyapradīpa*. He has quoted Sundaramiśra's view on *nāndī* in his commentary on Kālidāsa's play.

At the outset of their works, both Sundaramiśra and Rāghavabhaṭṭa have engaged in detailed discussions on the nature, purpose and method of presenting of *nāndī* at the beginning of a performance of a play, and extensively refer to several works and authors on this issue. Rāghavabhaṭṭa cites *Nāṭyapradīpa* as an authority.

नान्दीव्युत्पत्तिरुक्ता नाट्यप्रदीपे –

नन्दन्ति काव्यानि कवीन्द्रवर्गाः
कुशीलवाः पारिषदाश्च सन्तः।
यस्मादलं सज्जनसिन्धुहंसी
तस्मादियं सा कथितेह नान्दी।।[14]

This verse however does not occur in the available manuscripts of *Nāṭyapradīpa*. It is doubtful whether Rāghavabhaṭṭa is citing from Sundaramiśra's *Nāṭyapradīpa* or a work of identical name by some other author.

The date of composition of the commentary *Arthadyotanikā* by Rāghavabhaṭṭa cannot be ascertained. At the end of the commentary

---

13 एवं सति शकुन्तलाटीकायामृतुवर्णनस्यावमर्शसन्धौ प्रकरीवृत्तत्वम्, सन्ध्यन्तर-प्रोक्तमातलिवृत्तस्यावमर्शाङ्गानुविधायित्वाभात् प्रकरीवृत्तत्वं नास्तीति राघवभट्टेन यदुक्तं तदसदिव (तदसदेव)।

14 *Arthadyotanikā* of Rāghavabhaṭṭa, *Abhijñānaśākuntalam*, Lakhmi Venkateshwar Press, p. 15.

he informs that he was living in Kāśī (*Śrīviśveśvarapattane viracitā*) when it was written. Rāghavabhaṭṭa rightly claims to be an expert in *Nāṭyaśāstra*. It is possible that both Rāghavabhaṭṭa and Sundaramiśra were contemporaries and living at the same time in Kāśī, and had occasions to meet personally; so that either Sundaramiśra gave Rāghavabhaṭṭa a copy of the *Nāṭyapradīpa* or a part of it where the above stanza was included.

## References to Abhirāmamaṇi and a Lost Play Re-constructed

Sundaramiśra profusely draws examples and citations from his own play *Abhirāmamaṇi*, so much so that the play, otherwise lost, can be reconstructed on the basis of the references to it in *Nāṭyapradīpa*. It seems that Sundarmiśra wrote his treatise on dramaturgy for presenting his own play as an illustration of all the canons. Each and every category has been exemplified through *Abhirāmamaṇi*, the five junctures (*sandhis*) with their 64 constituents (*sandhyaṅgas*), five *avasthās* (states) five *arthaprakṛtis* (nature of plot), *nāṭyālaṁkāras*, 36 *kāvya lakṣanas*, 21 *anusandhis*, *patākāsthānakas*, etc. — *Abhirāmamaṇi* is an answer for all these. In fact, in the whole tradition of Sanskrit literature on theory, this is the only example of its kind, where an author cites from his own works as attestations to the concepts and categories.

*Abhirāmamaṇi* is a play in seven acts with *prakhyāta* (historical) type of plot as it is based of *Rāmāyaṇa* theme. Unlike *Māhāvīracarita* of Bhavabhūti, which set a model for several Sanskrit plays based on *Rāmāyaṇa* including this play, Sundaramiśra did not conceive *Abhirāmamaṇi* as a play dominated by heroic sentiment. Love between Rāma and Sītā remains the major theme here. It is a play of Śṛṅgāra *rasa*. But the Vīra *rasa* goes hand in hand together with the Śṛṅgāra here. The story of marriage and love between Rāma and Sītā — their separation and re-union is the main theme (*ādhikārika vṛtta*). The battle with Rāvaṇa does form a major episode, and because of that the play abounds in Vīra *rasa* also. However Sundaramiśra regards the Rāma's re-union with Sītā as the fruition — the *pradhāna phala* — of his play, the victory over Rāvaṇa and regaining the kingdom of Ayodhyā are

*anubandhas* or subsidiary gains only.[15] But then, he does not consider the Vīra *rasa* (heroic sentient) just as subsidiary in his play. He therefore makes another analysis of the whole scheme of the plot showing how all the *sandhis, sandhyaṅgas, avasthās*, etc. function for the realization of Vīra *rasa* also.

**The Reconstruction**

Rāma and Sītā see each other in a garden of Mithilā before marriage, on the eve of the event of Sītā's *svayaṁvara*. Sītā's friends, Buddhisenā, Sūnṛtā and Maitreyī serve as helpers in the consummation of the feeling of love. Sītā suffers from the pangs of separation. She sees Rāma in her dreams, tries to seek consolation through his portrait and in conversing about it with her friends. On the other hand, there is a *vidūṣaka* named Gomukha, and some boys (*vaṭus*) to help Rāma in this love affair. The imaginations soar high. Rāma feels the touch of Sītā's tender palms in his hands:

यदिदानीमार्यबद्धकङ्कणं तस्याः सुकुमारकरतलकोकनदं मम करकिसलये वर्तत इवेत्याकलयामीति

There are references to their meeting in the house of Yājñyavalkya, close to the royal palace of King Janaka.

The lamentations of Rāma after Sītā's abduction by Rāvaṇa are expressive of Karuṇa *rasa*. There are beautiful stanzas full of pathos describing the sadness after the demise of Daśaratha, i.e.:

तातेन यातेन दिवं प्रवृत्तः कोऽप्येष करुणाविरहैर्विमिश्रः, etc.

Like wise there are vigorous moments of exaltation in the descriptions of the heroic deeds of Rāma. Only starting words of such stanzas are cited by Sundaramniśra, viz.:

जेतारं जामदग्न्यस्य ...
कण्ठीरवेण रिपुकुम्भिकदम्बकानि ...

There are also fascinating usages of alliterations and puns like समं

---

[15] यथा प्रकृते सप्तमेऽङ्के विजयराज्यलाभफलान्तरानुबन्धेन सीतासमागमरूप-प्रधानफलनिर्वाहः ।

प्रजानामवनं वनं वा. The subsidiary plot (*patākā*) is related to Sugrīva and Vibhīṣaṇa and occurs in *garbhasandhi*. There is a minor episode (*prakarī*) comprised of the meeting of Rāma with the chief of Niṣāda community.

The play starts with a verse in the prologue hinting upon the theme of the play. There is a dialogue between the *sūtradhāra* and his consort, the *naṭī*. They talk about the spring season, as the entry of Rāma occurs during this season.[16]

In the prologue of the play, there is a reference to an old bow in a stanza. Śatānanda, the priest of Janaka stages his entry repeating this stanza. Thus the author has adopted *kathodghāta* (unearthing the story) type of the variety of prologue. The *pratimukha sandhi* begins from the second act. Rāma is being married to Sītā. There are descriptions of their joy at seeing and touching each other. However, the moments of happiness are overruled with the arrival of Paraśurāma and tussle with him continues up to the fourth act forming the *garbha sandhi* (embryo juncture) which continues up to the intermediary scene (*viṣkambhaka*) of the fifth act.

With the soliloquy of Śatānanda, the seed (*bīja*) of the story is sown. He describes King Janaka's anxiety for the marriage of his daughter, the condition of putting the string on Śiva's bow being too difficult. It also forms the stage of beginning (*ārambha*) out of the five stages of the plot. After the breaking of bow by Rāma, the episode of an encounter with Paraśurāma continues till the end of the fourth act. Śūrpaṇakhā manages to work as an evil spirit, and Rāma is banished for fourteen years. According to the author of *Nāṭyapradīpa*, this banishment is an *apāya* (an obstacle) but the limit of fourteen years is an *upāya* (way) for the fructification. Mārīca manages to deceive Rāma by his disguise as golden deer (*svarṇa mṛga*) and Rāvaṇa enters Rāma's hermitage

---

16 अग्रे रामप्रवेशावसरेऽभिनेयवसन्तोल्लेखात् सामान्यपरमथाद्येति पदं वसन्तपरमेव-मृतुमिति निर्देशोऽप्यत्र।
यथा प्रकृतेऽभिराममणौ - प्रथितयशसो जीर्णकार्मुकेत्यादिना बीजसूचकविषय - पराङ्मुखेत्याद्यन्तेन।
प्राधान्येन वाक्यं यथा प्रकृतेऽभिराममणौ - नेपथ्ये साधु भोः कुशीलवकुलावतंस साधु।

disguised as a monk to abduct Sītā. In the sixth act fierce battle with Rāvaṇa is described. In the last act, Vibhīṣaṇa provides the *puṣpaka vimāna* for Rāma's return to Ayodhyā. The play ends with *praśasti* (good wishes) for all. [17]

*Viṣkambhaka* (intermediary scene) has been used in first, second, fourth and sixth acts. It seems that Sundaramiśra has largely borrowed from Bhavabhūti's *Mahāvīracarita* in conceptualizing characters like Mālyavān, Rāvaṇa's minister. It is Mālyavān who incites Vālin to kill Rāma and Vālin approaches Rāma with an intention to kill the latter. In this way, Sundaramiśra has justified the killing of Vālin by Rāma. Following Bhavabhūti again, he has also removed the stigma from Kaikeyī's character, by introducing Śūrpaṇakhā. Śūrpaṇakhā cooks up a plot out of her evil design and a fake Kaikeyī seeks the two boons from King Daśaratha. One more change that Sundaramiśra made in the original story of Rāma related to the way Vibhīṣaṇa approached Rāma for refuge. Vibhīṣaṇa first makes and an appointment with Sugrīva, and it is through the recommendation of Sugrīva that he is able to win Rāma's favour. This change has been made with a view to exalt the dignity of the hero.[18]

Sundaramiśra takes pride in describing the innovations and novel designs introduced by him. He particularly dotes upon the use of *bindu* and its expansions in the conception of the plot.[19]

The dialogues in *Abhirāmamaṇi* are simple and expressive of the feelings. Unfortunately, Sundaramiśra cites only a few full sentences,

---

17 प्रशस्तिः शुभशंसनम्। यथा प्रकृते - जगति परगुणेषु पक्षपातीत्यादिना शुभशंसनमर्थाद्यथा मम निराधि हृदयं तथाऽन्यसहृदयस्यापि भवत्विति सर्वकार्यानुगता प्रशस्तिः।

18 यथा प्रकृते नायकस्यानुचितच्छद्मना वालिवधो माल्यवत्समुत्तेजितो रावणसौहार्देन वधार्थमागतो वाली हत इत्यन्यथा कृतः। कैकेय्यास्तादृशवरद्वयप्रार्थनमनुचितं शूर्पणखादेशेन कृतमित्यन्यथा कृतम्। समुत्सन्नेऽभियोगे विभीषणस्य रामसमीपागमनमनुचितं प्रागेवाभियोगात् विभीषणः सुग्रीवस्थानमागत इत्यन्यथा कृतम्।

19 प्रकृते चेटीद्वारकसीतासमागमकारणसूर्यास्तोदयविरहवर्णनादिना कार्यप्रसङ्गविच्छेदे समीहितं जातमेवेति कार्यस्योक्तावप्रस्तुतमंशयाकारणस्य (संशयकारणस्य) व्यञ्जनरूपे अनुरागचापारोपणादिबीजानां प्रतिमुखसन्धावपि बिन्दुसंज्ञासम्पादनं किञ्चन निजकौशलम्।

and mostly gives two or three words that occur in the beginning of a dialogue to as an illustration. Here are some examples of his diction:

शतानन्दः – विषयपराङ्मुखमनसो योगिवरस्यापि विदिततत्त्वस्य त्यागावसरे बाढं कार्यचिन्तालवस्तु नो भवति। (साकूतम्) एवमेतत् कः सन्देहः, तथाहि – नितान्तयोगाभ्यासनिर्मलचेतसाऽनेन महाराजजनकेनापि मम पुरश्चिन्तासूचकमिति मन्त्रितम्।
जनकः – भगवत्शतानन्द महीमण्डले चन्द्रचूडचापारोपणसमर्थः कोऽपि न सम्भाव्यते।

The flow of language and charm of alliterations make the citations good reading:

कुलकुसुमकोमलप्रकृतिः खल्ववयं कुमारीलोकः।
कमठकठिनगात्रैः भद्रासने भूषणभासि


Sundaramiśra has exhibited his proficiency in the appropriate use of metres . The rhythmic patterns of long metres like *Śārdūlavikrīḍita* and *Sragdharā* in this play enhance the experience of heroic sentiments. He also aptly uses small metres like Anuṣṭup to indicate swiftness and quick action.

I am thankful to the authorities of Dr Harisingh Gour University, Sagar and especially the Sanskrit Department of this university where I had initially taken up the project on preparing a critical edition of Sandaramiśra's *Nāṭyapradīpa*. I am thankful to Prof. Rahas Vihari Dwivedi for having sent me a copy of the manuscript of *Nāṭyapradīpa* from Sarasvati Bhawan Library of the Sampurnanand Sanskrit University, when he was working as the Director of Research and Publications there and permitting me to make use of the manuscript. I am extremely thankful to Prof. Rajendra Nanavati who helped me in securing the other manuscript of *Nāṭyapradīpa* from the India Office Library, London. The project could not have been taken up and completed but for the source material made available by these friends.


With the publication of this work, Sundaramiśra joins the galaxy of great stalwarts in the field of the art of drama and theatre – Bharata, Lollaṭa, Śaṅkuka, Bhaṭṭanāyaka, Abhinavagupta, Dhanañjaya, Viśvanātha and others. Pishunhara Dayānātha and Prem Narayan

Tiwadi (Tiwari) are the unsung heroes for my work. It is a happy coincidence that the work is seeing light in the year of the centenary of the purchase of its manuscript by the former from Tiwari. The one rupee which Dayānātha invested in the purchase led to preservation of a gem. I pay my humble tributes to all these personalities.


**Radhavallabh Tripathi**



Ms. A first folio



Ms. A first folio



Ms. B second folio

# नाट्यप्रदीपः
# सुन्दरमिश्रविरचितः

श्रीगणेशाय नमः।[1]

स्फुरत्सुरतरङ्गिणिप्रचलदक्षिकोणाहत–
प्रविष्टनगनन्दिनि प्रचलदङ्घ्रि[2]निर्वाहणम्।
नटन्नटचरस्थितिस्थगिततालकालास्थिरं
दिगम्बरपुरन्दरं नमत सुन्दरं तन्महम्।।१।।
मालसानलसशीलशालिनां दक्षतातिजडताजुषां कृते।
नाटकप्रकृतिरूपलक्षणं सङ्क्षिपामि निजनव्यलक्षणम्।।२।।

## नान्दीविचारः

अथ प्रकृतोपयोगि[3]क्रमेणैव नान्द्यादिविचारः क्रियते[4]।
तत्र भरतः।
आशीर्वचनसंयुक्ता नित्यं यस्मात् प्रयुज्यते।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता[5]।
सूत्रधारः पठेत्तत्र मध्यमं स्वरमाश्रितः।
नान्दीं पदैर्द्वादशभिरष्टाभिर्वाप्यलङ्कृताम्[6]।।

---

[1] Ms. A has the following notes given by its owner on the first folio:
मातङ्गश्रुतिवातशोषितशचीशृङ्गारपत्रावली
वाहव्यूहविलोलधूलिमलिनब्रह्मासनाम्भोरुहि
प्रस्थाने तव भैरिभैरवरवव्यालोलसप्तार्णव –
क्लृप्तावस्थितिवैपरीत्यविपदि व्यस्तं समस्तं .... (जगत्?)
नाट्यप्रदीपपुस्तकमिदम्।।

व्यासोपाख्यनागरत्वव्याप्यजातीयपिशुनहरा दयानाथस्येदम्, प्रेमनारायण तिडीसु (तिवाडीसु?) १ रुपया एक दे के लीया मिती अषाढ वदि ७ गुरुवार संवत् १९७२.

[2] Ms. B reads – प्रचलदङ्ग।

[3] Ms. B reads प्रकृतोपयोगोप।

[4] विचाराः क्रियन्ते। Ms. B.

[5] NŚ V. 24, p. 215.

[6] NŚ V. 104, p. 234 II Line reads "नान्दीपदैः ......."

अस्य व्याख्याने मातृगुप्ताचार्यैः षोडशादिपदान्वितापीयमुदाहृता[७] ।।

अत्र

श्लोकपादं पदं केचि[८]त्सुप्तिङन्तमथापरे।
परेऽवान्तरवाक्यं च पदमाहुर्विशारदाः ।।

एषु कार्यो विरामः पादेऽर्धे समाप्तेऽर्थे पदेऽपि वेति[९] भरतोक्तौ विश्रामो बीजम्।
तद्वदर्धे विश्रामाभिधानात् पद्यार्धमपि पदं केचिदूचुः।।

अत एव वेण्यां षट्पदापि नान्द्युपपद्यते[१०]।

ग्रन्थान्तरे -

मङ्गल्यशङ्खचन्द्राब्जा कोककैरवशंसिनी
आशीर्नमस्क्रियाश्लोको नान्दी काव्यार्थसूचकः[११]।

मङ्गल्यं दूर्वाकलशकुसुमच्छत्रादि। नान्द्यां मङ्गल्यशङ्खचन्द्राब्जाद्यन्यतम-ग्रहणं काव्यार्थसूचनं प्रायिकं भरतेनानुक्तत्वाल्लक्ष्येष्वनियमाच्च। काव्यार्थसूचने परं चमत्कारातिशयः। ग्रन्थान्तरे च -

आशीर्नमस्क्रियावस्तुनिर्देशान्यतमा स्मृता।
चन्द्रनामाङ्किता प्रायो मङ्गलार्थपदोज्ज्वला।।

अष्टाभिर्दशभिश्चेयमर्कैः[१२] षोडशभिः पदैः।
समैर्वा विषमैर्वाऽपि कार्या नान्दी परे जगुः।

भरते नान्द्यवसरे स्थापकाप्रवेशान्नान्दीपाठः प्रथमसूत्रधारस्यैव।।

पुनर्भरतः

त्र्यस्रं वा चतुरस्रं वा शुद्धं चित्रमथापि वा।

---

७ मातृगुप्त has been cited by Abhinavagupta and other authors. For details see *Aprāptanāṭyaśāstrīya Grantha* edited by me.

८ Ms. A reads — अत्र श्लोकपदं केचित्।

९ No such verse exactly occurs in NŚ.

१० There are three *nāndī* verses in *Venisaṁhāra* I.1-3. If the half of each verse is taken as *pada* then all the three combined would form षट्पदा नान्दी।

११ आशीर्नमस्क्रिया श्लोका नान्दीका नान्दी काव्यार्थसूचकः in Ms. B the repetition नान्दीका नान्दी must be scribers error.

१२ Ms. B reads यमर्कौः षोडशभिः पदैः. अर्कैः coming after दशभिः means the number of twelve.

प्रयुज्य रङ्गं निष्क्रामेत् सूत्रधारः सहानुगः।।
स्थापकः प्रविशेत् तत्र सूत्रधारगुणाकृतिः।
अत्यन्तमधुरैः श्लोकैर्नानाभावसमन्वितैः।
प्रसाद्य रङ्गं विधिवत् कवेर्नाम च कीर्तयेत्[१३]।।
अत्रापि भरतानुक्तत्वात् काव्यार्थसूचनं प्रायिकम्।

## प्रस्तावनाविचारः

**ग्रन्थान्तरे**

अथोपादाय मधुरान् श्लोकान् काव्यार्थसूचकान्।
ऋतुं च कञ्चित् प्रायेण भारतीं वृत्तिमाश्रयेत्[१४]।।

प्रायेणेत्युपादानात् मधुरश्लोकोपादानं ऋतूपादानं च प्रायिकम्। प्रथमसूत्रधारस्य विनिर्गतत्वात् प्रकरणाच्च भरते मधुरश्लोकपाठः स्थापकस्यैव। नान्दीपाठो मधुरश्लोकपाठश्च लक्ष्ये क्वचिदुभयं क्वचिदेकम्। यथा वेणीसंहारे - (नान्द्यन्ते)

श्रवणाञ्जलिपुटपेयं विरचितवान् भारताख्यममृतं यः।
तमहमरागमकृष्णं कृष्णद्वैपायनं वन्दे।।

प्रस्तुतभारतकथासूचके प्रस्तुतो भारतकर्तृव्यासवन्दनार्थो मधुरश्लोकोऽपि। एवं मालविकाग्निमित्रादौ। एवं सिद्धे नान्द्यन्ते सूत्रधार इत्यस्यायमर्थः - प्रथमसूत्रधारपठिताया नान्द्या अन्ते प्रथमस्य विनिर्गतत्वादर्थाद् द्वितीयसूत्रधारः स्थापकः प्रविशति वदति च।

**धनिकेन**

पूर्वरङ्गं विधायादौ सूत्रधारे विनिर्गते।
प्रविश्य तद्वदपरः काव्यमास्थापयेन्नटः।।[१५]

पूर्वरङ्गं विधाय विनिर्गते प्रथमसूत्रधारेऽत्र प्रथमपदोपादानात् द्वितीयः स्थापक इत्युक्तम्। कालं वृत्तमुपाश्रित्य[१६] सूत्रधृग् यत्र वर्णयेत् तदाश्रयश्च पात्रस्य प्रवेशस्तत् प्रवृत्तकमित्यादिप्रवृत्तककथोद्घातप्रस्तावनालक्षणेषु नियमेन स्थापके

---

[१३] Comp. DR III.4, NŚ V.165 reads - सुवाक्यमधुरैः श्लोकैः
एषामन्यमेनार्थं पात्रं चाश्रिप्य सूत्रभृत्
प्रस्तावनान्ते विनिर्गच्छेत् ततो वस्तु प्रपञ्चयेत्।। DR III.21.25

[१४] रङ्गं प्रसाद्य मधुरैः श्लोकैः काव्यार्थसूचकैः।
ऋतुकञ्चिदुपादाय भारतीं वृत्तिमाश्रयेत्।। DR III.4

[१५] DR III.2.

[१६] Ms. B reads मथाश्रित्य।

सूत्रधारपदप्रयोगो भरतेऽपि स्थापकस्य द्वितीयसूत्रधारत्वबोधनायैव।

यद्वा सूत्रधारपदं स्थापके लाक्षणिकम्। यथा पञ्चावयववाक्ये धूमज्ञानादिति वक्तव्ये सम्प्रदायानुरोधाद् धूमादित्येव नियमेन लाक्षणिकपदप्रयोगः। तथात्रापि सम्प्रदायानुरोधात् सर्वथा प्रथमसूत्रधाराभेदावगमकेदृशाऽ-[१७] तिशयोक्तिमूलाऽध्यवसान-लक्षणा। अथपदस्य[१८] कविसर्वस्वत्वाच्च च स्थापके लाक्षणिकसूत्रधारपदप्रयोगः सर्वत्र नियमेन। किञ्च प्रत्याहारादिकान्यङ्गानि भूयांसि यद्यपि तथाप्यवश्यं कर्तव्या नान्दीविघ्नोपशान्तय[१९] इत्यत्र भरतोऽपि नित्यं यस्मात् प्रयुज्यते इति प्रागुक्तवाक्ये चास्या नित्यत्वाभिधानात् प्रत्याहारावतरणारम्भोत्थापनादिषु पूर्वरङ्गाङ्गेषु नान्द्या आवश्यकत्वम्, तत्सर्वत्रनियमेन नान्द्यन्त इत्यपि प्रयोग उपपद्यत इत्येकः पक्षः। द्वितीयस्तु ग्रन्थान्तर्गतात्यन्तावश्यकप्रथमसूत्रधारपठितनान्द्या अन्ते सूत्रधारः स्थापकः आदित एव मधुर श्लोकाकादिकं वदतीति धनिकस्यायमेवार्थः सम्मतः। यत्त[२०]-

रङ्गं प्रसाद्य मधुरैः श्लोकैः काव्यार्थसूचकैः।
ऋतुं कञ्चिदुपादाय भारतीं वृत्तिमाश्रयेत्।।[२१]

इत्यस्य व्याख्याने-औत्सुक्येन कृतत्वरेत्यादि नान्दीस्थरत्नावलीश्लोकान्मधुर-श्लोकत्वेनैव समुदाहृतवान्। अत्र पक्षे अमङ्गलत्वान्नान्द्यन्ते सूत्रधार इत्यादावेव न लिख्यत इति बोध्यम्। अत्र निजकृते प्रकृतेऽभिराममणिनाटके रागस्ते सहजोऽपीत्यादिश्लोकः काव्यार्थसूचकः। कोकनदशंसीवर्णनिष्ठव्यञ्जनया कोकशंसी पद्मानां प्रिय इति व्युत्पत्या च चन्द्रशंसी च नान्दीस्वरूपो मधुरश्लोकस्वरूपो वा। नान्दीपाठे मधुरश्लोकपाठे वा विहिते स्थापकेन प्ररोचना विधेया। लक्षणं त्वस्याः

---

१७ Ms. B reads दशा।

१८ Ms. A reads श्रयपदस्य।

१९ SD VI.10. The interpretation of indispensability of *nāndī* has been derived from the use of the word *nityam* in Bharata's definition. Abhinavagupta has offered a suitable explanation here. अहरहश्चैषा प्रयोगे प्रयोज्या, एषा च नित्यमेव रूपैव । अन्यपाठ्यानामुत्थापकदीनां प्रयोगवशादन्यथात्वोपपत्तिर्दृश्यते न तु नान्दीपाठस्येति नित्यशब्दस्याभिप्रायः।
The injunction regarding indispensability of *nāndī* actually occurs in the following verse also:
यद्यप्यङ्गानि भूयांसि पूर्वरङ्गस्य नाटके। NŚ V.165
तथाप्यवश्यं कर्तव्या नान्दीश्वरप्रिया।।

२० Ms. B reads यत्तः।

२१ NŚ V.165.

उन्मुखीकरणं तत्र प्रशंसातः प्ररोचना।

कविसभ्यनटनाटकादीनां प्रस्तुतार्थानां[२२] प्रशंसनेन श्रोतॄणां प्रवृत्त्युन्मुखीकरणं प्ररोचना।[२३] यथा प्रकृते अभिराममणौ - अद्य खलु सुरासुरेत्यादिना कथयन्तु चिन्ताया कारणमार्य इत्यन्तेन। अग्रे रामप्रवेशावसरेऽभिनेयवसन्तोल्लेखात् सामान्यपरमथाद्येति पदं वसन्तपरमेवमृतुमिति निर्देशोऽप्यत्र। ततः कथोद्धातादिषोडशनिजाङ्गान्यतमयुक्ता यत्किञ्चित् प्रस्तुतेतिवृत्तसूचिका आमुखापरपर्यायप्रस्तावना विधेया। लक्षणं त्वस्याः

सूत्रधारो नटीं ब्रूते मार्षं वाऽथ विदूषकः।
स्वकार्यं प्रस्तुताक्षेपि चित्रोक्त्या यत् तदामुखम्।।

प्रस्तावना वाथ तत्र स्युः कथोद्घातः प्रवृत्तकम्।
प्रयोगातिशयाश्चाथ वीथ्यङ्गानि त्रयोदश।।[२४]

यथा प्रकृतेऽभिराममणौ-प्रथितयशसो जीर्णकार्मुकेत्यादिना बीजसूचकविषय-पराङ्मुखेत्याद्यन्तेन। दशरूपके -

एषामन्यतमेनार्थं पात्रं चाक्षिप्य सूत्रभृत्।
प्रस्तावनान्ते निर्गच्छेत् ततो वस्तु प्रपञ्चयेत्।।[२५]

कथोद्घातादिषोडशाङ्गानाम् अर्थं प्रस्तुतेतिवृत्तम्। अत्रैवार्थः पात्रमध्ये बीजस्य प्रस्तावनान्ते आदिभूते सति वृत्तपात्रप्रवेशात्मकमुखस्य चान्तर्भावः। अनेन दिव्यमर्त्ये स तद्रूपो मिश्रमन्यतरस्तयोः[२६] संस्थापको दिव्यं वस्तु दिव्यो भूत्वा मर्त्यान्यतरो भूत्वा सूचयेत्। सूचयेद्वस्तु बीजं वा मुखं पात्रमथापि वा[२७] गतार्थम्। कथोद्घातलक्षणं तु -

स्वेतिवृत्तसमं वाक्यमर्थं वा यत्र सूत्रिणः।
गृहीत्वा प्रविशेत् पात्रं कथोद्घातो द्विधैव सः।।[२८]

प्राधान्येन वाक्यं यथा प्रकृतेऽभिराममणौ-नेपथ्ये साधु भोः कुशीलवकुलावतंस साधु। अत्राप्रस्तुतप्रशंसालङ्कारेण विषयपराङ्मुखेत्यादि सार्थवाक्यग्रहणकार्यसाधुवादेन

---

२२ Ms. B reads प्रकृतार्थानां।

२३ Comp. DR III.6 — "उन्मुखीकरणं तत्र प्रशंसातः प्ररोचना"।

२४ DR III.7b-9a.

२५ DR III.21.

२६ DR III.3.

२७ DR III.3.

२८ DR III.9.

स्वकारणीभूतसार्थवाक्यग्रहणमाक्षिप्तम्। व्यक्तीभविष्यति चेदमुपरिष्टात् – प्रविश्य शतानन्दः तदेव पद्यं पठित्वेत्यन्तेन। अत्र कथोद्घातनिर्वाहिका नेपथ्ये इतीयं चूलिका। वाक्यार्थं यथा मुद्राराक्षसे –

क्रूरः ग्रहः सकेतुश्चन्द्रं सम्पूर्णमण्डलमिदानीम्। अभिभवितुमिच्छति बलात् –

नेपथ्ये – आः क एष मयि स्थिते चन्द्रगुप्तमभिभवितुमिच्छति।[२९] वेण्यामपि – स्वस्था भवन्ति मयि जीवति धार्तराष्ट्राः।[३०]

अथ प्रवृत्तकम्।

कालसाम्यसमाक्षिप्तप्रवेशः स्यात् प्रवृत्तकम्।[३१]
आसादितप्रकरनिर्मलचन्द्रहासः प्राप्तः शरत्समय एष विशुद्धकान्तः।
उत्थाय गाढतमसङ्घनकालमुग्रं रामो दशास्यमिव सम्भृतबन्धुजीवः।।

ततः प्रविशति यथोद्दिष्टो रामः।[३२] अत्र शरत्कालसाम्येन मुखस्वरूपस्वेतिवृत्त-रामपात्रप्रवेशाक्षेपः।

अथ प्रयोगातिशयः।

एषोऽयमित्युपक्षेपात् सूत्रधारप्रयोगतः।
पात्रप्रवेशो यत्रैष प्रयोगातिशयो मतः।।[३३]

एषोऽयमिति असावहमित्यस्य आदि पात्रनाम्नोपलक्षणम्। नाप्यत्र विभक्तिनियमः। यथा मालविकाग्निमित्रे

शिरसा प्रथमगृहीतामाज्ञामिच्छामि परिषदः कर्तुम्।
देव्या इव धारिण्या सेवादक्षः परिजनोऽयम्।।[३४]

शकुन्तलायाम् – एष राजेव दुष्यन्त इति।[३५]

मालत्याम् –

सूत्रधारः – बाढम् एषोऽस्मि कामन्दकी संवृत्तः।

---

२९ *Mudrārākṣasa* I.6 and the dialogue of Cāṇakya following it.

३० *Veṇīsaṁhāra* I.8.

३१ DR III.10.

३२ This verse is from the play छलितराम as quoted by Dhanika in the *Vṛtti* of DR III.10.

३३ DR III.10.

३४ *Mālavikāgnimitram* I.3.

३५ *Abhijñānaśākuntalam* I.5.

नटः – अहमप्यवलोकितेति।

तत उभे प्रविशतः।[३६]

कुन्दमालायाम् – नेपथ्ये – इत इतोऽवतरत्वार्या।

सूत्र. – कोऽयं खल्वार्याह्वानेन साहाय्यकमपि मे सम्पादयति। (विलोक्य) – कष्टमतिकरुणं वर्तते।

लङ्कश्वरस्य भवने सुचिरं स्थितेति
रामेण लोकपरिवादभयाकुलेन।
निर्वासितां जनपदादपि गर्भगुर्वीं
सीतां वनाय परिकर्षति लक्ष्मणोऽयम्।।[३७]

उदात्तराघवेऽपि

रामो मूर्ध्नि निधाय काननमगान्मालामिवाज्ञां गुरो-
स्तद्भक्त्या भरतेन राज्यमखिलं मात्रा सहैवोज्झितम्।
तौ सुग्रीवविभीषणावनुगतौ नीतौ परां सम्पदं
प्रोद्वृत्ता दशकन्धरप्रभृतयो ध्वस्ताः समस्तद्विषः।।[३८]

अत्रादिपात्रनामोपक्षेपादितिवृत्तपर्याश्रयत्वाक्षेपी प्रयोगातिशयः। प्रकृते – कथमयं जनकस्य पुरोहितः शतानन्द इत एवाभिवर्तते। अत्र कथोद्घातस्य सामान्यतः पात्रप्रवेशानुगुण्यम्। प्रयोगातिशयस्य विशेषतः। शतानन्दत्वेन पात्रप्रवेशानुगुण्यमिति बोध्यम्।

वीथीरूपकस्य तु त्रयोदशाङ्गानि – भारतीवृत्त्यङ्गप्रस्तावनाङ्गानि स्वातन्त्र्येण भारतीवृत्तेरप्यङ्गानीति भारतीवृत्त्यवसरे तानुदाहरिष्यामः। पात्रप्रवेशस्य प्रस्तावनाबहिर्भूतत्वादेतेषां कथोद्घातादीनां पात्रप्रवेशानुगुण्यमात्रमेवेति निष्कर्षः।

अत्र सर्वत्र सूत्रभृन्निर्गमात्प्रागर्थसञ्चयः प्रस्तावना तदन्ते सूत्रभृन्निर्गमः तदनन्तरं वस्तुप्रपञ्चनम्।।

## इतिवृत्तविचारः

वस्त्वितिवृत्तम्। तच्चाधिकारिकं प्रासङ्गिकं चेति द्विविधम्।

---

[३६] These dialogues occur in the prologue of Bhavabhūti's *Mālatīmādhava*.

[३७] *Kundamālā* I.3.

[३८] This verse from the play *Udāttarāghava* has been cited by Dhanika in his *Avaloka* on DR III.3.

तत्राधिकारिकं मुख्यमङ्गं प्रासङ्गिकं विदु[39] रिति।

अधिकारेण प्राधान्येन निर्वृत्तं वृत्तमाधिकारिकम्। यथा प्रकृते सीतारामवृत्तान्तः। यस्य मुख्योपकारकस्य सता प्रसङ्गतः स्वार्थः तत्प्रसङ्गान्निर्वृत्तमितिवृत्तं प्रासङ्गिकम्। तदुक्तम् – प्रासङ्गिकं परार्थस्य[40] स्वार्थो यस्य प्रसङ्गत इति।

तच्च पताकाप्रकरीभेदाद् द्विविधम्। व्यापिप्रासङ्गिकं वृत्तं पताकेत्यभिधीयते। यथा – प्रकृते गर्भसन्धिमारभ्यासमाप्तिसुग्रीवविभीषणवृत्तान्तः पताका। मालत्यां च आदित आरभ्यासमाप्ति मकरन्दमदयन्तिकावृत्तान्तः पताका। यत्तु मुनिनोक्तमागर्भादाविमर्शाद्वा पताका विनिवर्तत इति तत्र पताकेति पताकानायकफलम् निर्वहणपर्यन्तमपि पताकायाः प्रवृत्तिदर्शनादिति व्याख्यातमभिनवगुप्तपादैः। तथा प्रवृत्तेः पताकानायकयोः सुग्रीवविभीषणयो राज्यलाभरूपफलं त्ववमर्शसन्धौ दर्शितम्। मालत्यां च मकरन्दस्य मदयन्तिकालाभो गर्भसन्धौ दर्शितः।

प्रकरीवृत्तं तु – प्रासङ्गिकं प्रदेशस्थं चरितं प्रकरी मता। यथा प्रकृते– निषादराजगुहस्य वृत्तान्तः। सुग्रीवविभीषणसङ्घटनया परार्थस्य लक्ष्मणमैत्रीलाभः स्वार्थोऽपि औत्सर्गिकप्रसङ्गप्राप्तत्वादि प्रासङ्गिकं वृत्तद्वयमथौत्सर्गिकम्, सति प्रसङ्गे स्यादसति तु न स्यादित्यनियतम्। अत एव वक्ष्यति च गर्भसन्धौ पताका स्यान्न वा स्यादिति। तथा सति रत्नावल्यां प्रासङ्गिकं वृत्तद्वयमप्युपेक्षितम्।

एवं सति शकुन्तलाटीकायामृतुवर्णनस्यावमर्शसन्धौ प्रकरीवृत्तत्वम्, सन्ध्यन्तप्रोक्तमातलिवृत्तस्यावमर्शाङ्गानुविधायित्वाभात् प्रकरीवृत्तत्वं नास्तीति राघवभट्टेन यदुक्तं तदसदिव (तदसदेव)। ऋतुवर्णनस्य स्वार्थाभावेन प्रासङ्गिकवृत्तसामान्यलक्षणानाक्रान्तत्वात्। तत्र मातलिवृत्तमेव प्रकरीवृत्तम्। शकुन्तलासङ्घटनया परार्थस्यास्यासुरविजयः स्वार्थोऽपि। प्रासङ्गिकवृत्तस्याप्यौत्सर्गिकत्वेन न सन्ध्यङ्गानुविधायित्वमप्रयोजकम्। अत एव धनिकेन एतानि द्वादश गर्भाङ्गानि प्राप्त्याशाप्रदर्शकत्वेनोपनिबन्धनीयानीत्येवोक्तम्। त्रिविधस्याप्यस्येतिवृत्तस्य त्रैविध्यम् –

प्रख्यातोत्पाद्यमिश्रत्वभेदात् त्रेधाऽपि तत् त्रिधा।
प्रख्यातमितिहासादेरुत्पाद्यं कविकल्पितम्।
मिश्रं च सङ्करात् ताभ्यां दिव्यमर्त्यादिभेदतः।।[41]

---

३९ DR I.11.

४० DR I.13; Both Mss. A and B have corrupt reading as पदार्थस्य. B reads पदार्थस्य स्वार्थो यस्य प्रसंगात्।

४१ DR I.15-16.

यथा प्रकृते रामायणप्रसिद्धं प्रख्यातं वृत्तम्। वस्तु प्रपञ्चने विशेषः। यत्तत्रानुचितं किञ्चिन्नायकस्य विरुद्धं तत् परित्याज्यमन्यथा वा प्रकल्पयेत्[४२] तत्रेतिवृत्ते यदुक्तम् –

अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम्।
प्रसिद्धौचित्यबन्धो हि रसस्यौपनिषत् परा।। इति

यथा प्रकृते नायकस्यानुचितच्छद्मना वालिवधो माल्यवत्समुत्तेजितो रावणसौहार्देन वधार्थमागतो वाली हत इत्यन्यथा कृतः। कैकेय्यास्तादृशवरद्वयप्रार्थनमनुचितं शूर्पणखादेशेन कृतमित्यन्यथा कृतम्। समुत्सन्ने ऽभियोगे विभीषणस्य रामसमीपागमनमनुचितं प्रागेवाभियोगात् विभीषणः सुग्रीवस्थानमागत इत्यन्यथा कृतम्। साहित्यदर्पणे –

अविरुद्धं तु यद् वृत्तं रसाभिव्यक्तये ऽधिकम्।
तदन्यथयेद् धीमान्न वदेद्वा कदाचन।।

अधिकरसोत्पत्तये अविरुद्धमपि वृत्तमन्यथयेत्। अतिविस्तृतमविरुद्धमपि त्यजेद्वा। एतन्मूलीभूतं नाटकलक्षणे भरतेऽपि किञ्चिदुत्पाद्यवस्तु चेति। यथा प्रकृते – अधिकरसोत्पत्तये बुद्धिसेना–सूनृता–मैत्रेयी–साहाय्यम्। सीतायाः स्वप्नदर्शन–चित्रदर्शन–साक्षाद्दर्शन–विरहादायः प्रागेवदर्शिताः। रामस्य वटुसाहाय्यं च दर्शितम्। छद्मना वालिवधो मायुराजेन तूदारराघवे परित्यक्तमेव। रसस्य विरुद्धं रसदोषावहम्।

रसदोषास्तु–व्यभिचारिरसस्थायिभावानां
शब्दवाच्यतेत्यादयः काव्यप्रकाशोक्ताः बोद्धव्याः।[४३]

अनेन प्रकारेणानौचित्य–रसदोषपरिहार–विशुद्धं कृतसूच्यदृश्यवस्तुविभागं प्रस्तावनान्तमारभ्यासमाप्ति सर्वमितिवृत्तं फलागमानुसारेणोपक्लृप्तबीजबिन्दुपताका–प्रकरीकार्यलक्षणार्थप्रकृतिपञ्चावस्थानुगुण्येन पञ्चधा विभजेत्। पञ्चविभागा मुखादि पञ्चसन्धयः स्युः। पुनरपि वैकैकस्य सन्धेर्द्वादश–त्रयोदश–चतुर्दशेत्येवं विभागं कुर्यात्। तानि चतुःषष्टिरङ्गानि स्युः। तदुक्तम् –

आद्यन्तमेवं निश्चित्य पञ्चधा तद्विभज्य च।
खण्डशः सन्धिसञ्ज्ञांश्च विभागानपि च खण्डयेत्।
चतुःषष्टिश्च तानि स्युरङ्गानीत्यपरं तथा।।

---

[४२] This is an obvious reference to DR III.22 – यत् तत्रानुचितं किञ्चिन्नायकस्य रसस्य वा। विरुद्धं तत् परित्याज्यमन्यथा वा प्रकल्पयेत्।।

[४३] *Kāvyaprakāśa* VII.60-62.

## अर्थप्रकृतिविचारः

**अर्थप्रकृतयस्तु -**

बीजबिन्दुपताकाख्यप्रकरीकार्यलक्षणाः।
अर्थप्रकृतयः पञ्च ता एताः परिकीर्तिताः।[४४]
अर्थस्य प्रयोजनस्य सुखरूपस्य प्रकृतयः सिद्धिहेतवः।[४५]
कार्यं तु। कार्यं त्रिवर्गस्तच्छुद्धमेकानेकानुबन्धि च।[४६]

त्रिवर्गो धर्मार्थकामाः कार्यं फलमिति यावत्। अर्थपदेन मात्रधर्मकामातिरिक्तं सुखसाधनं गृह्यते - तेन कीर्ति-जय-राज्यचाणक्यशिखाबन्धन-द्रौपदी-केशसंयमन-चक्रवर्तीपुत्रप्रबोध-चन्द्रोदयादयो ह्यर्थास्तत्र तत्रोक्ताः सङ्गच्छन्ते। तच्च शुद्धमेकैकं एकद्वयाद्यनुबन्धं वा। यथा प्रकृते दुर्वृत्तरावणनिग्रह-जन्यधर्मविजयराज्यलाभरूपार्थफलान्तरविशिष्टकामस्वरूपः सीतासमागमः तात्पर्यम्, तच्च समाप्तौ राज्यं निदेशे इत्यादि श्लोके स्फुटम्। स्तोकोपक्षिप्तः पुरस्ताद्वितीर्णस्य कार्यस्य हेतुबीजवद् बीजम्। तच्चानेकप्रकारम्। मुख्यावान्तरकार्यहेतुभेदात्। तदुक्तम् -

स्वल्पोद्दिष्टस्तु तद्धेतुर्बीजं विस्तार्यनेकधा।[४७]

यथा प्रकृते - शतानन्दः - विषयपराङ्मुखमनसो योगिवरस्यापि विदिततत्त्वस्य त्यागावसरे बाढं कार्यचिन्तालवस्तु नो भवति इति पद्यं पठित्वा साकूतमेवमेतत् कः सन्देहः, तथाहि - नितान्तयोगाभ्यासनिर्मलचेतसाऽनेन महाराजजनकेनापि मम पुरश्चिन्तासूचकमिति मन्त्रितम्। भगवत्शतानन्द महीमण्डले चन्द्रचूडचापारोपणसमर्थः कोऽपि न सम्भाव्यते इत्यादिना विनिर्गता इत्यन्तेन सीतासमागमहेतुर्दानकालीना कार्यानुकूला प्राकरणिकी जनकस्य चिन्ता बीजम्। अप्राकरिणिकी सीताहरण-कालीना व्यङ्ग्या रसस्य चिन्ता च कोऽप्येषकरुणेत्यादि पद्ये व्यक्ता बीजम्। अत्र चिन्तासूचकसम्भावनाख्योत्कटकोटिकसन्देहे वा न रावणाधिकपराक्रमः चापारोपण-समर्थः कदाचित् कश्चित् स्यादित्यनुत्कटकोट्युपक्षिप्तं रामस्य पराक्रमः चापारोपणं च बीजम्। जनकचिन्ताचापारोपणसमर्थान्वेषणधनुरुपदर्शनादिद्वारा। रामचिन्ता तु रावणनिग्रहद्वारा। पराक्रमस्तु पूर्वं धनुर्भङ्गद्वारा, पश्चाद् रावणनिग्रहद्वारा कार्यहेतुरितिबोध्यम्। वेणीसंहारे भीमक्रोधसहकृतो युधिष्ठिरोत्साहो बीजम्।

---

[४४] DR I.18.

[४५] Comp. Dhanika on DR I.18.

[४६] DR I.16.

[४७] DR I.16.

मालत्याम् अपत्यसम्बन्धविधिप्रतिज्ञापरस्परानुग्रहादि बीजम्। अथ वक्ष्यमाण-विशेषलक्षणक्रीतमुख्यकार्यावान्तरकार्याणां बिन्दुरिति संज्ञान्तरम्, स च जले तैल-बिन्दुवत् सरणशीलो बिन्दुः। तदुक्तम् - अवान्तरार्थविच्छेदे विन्दुरच्छेदकारणम्। अवान्तरे मध्ये, अर्थस्य मुख्यावान्तरकार्यस्य विच्छेदे। अप्रसङ्गे सत्यनन्तरं सर्वप्रसङ्गकृत् बिन्दुः। कारकज्ञापकसाधारणोऽसाविति मातृगुप्ताचार्यसम्मतं मध्ये कार्यप्रसङ्गकृद्धेतुरित्यन्येषां मतम्। यथा प्रकृते वसन्तवर्णन-वायुवर्णनादिना मध्येऽर्थविच्छेदेऽनन्तरं रामः - सखे, दक्षिणेक्षणस्फुरणेनेत्यारभ्य सीता - (स्वगतम्) (*सिविणअदिट्ठं राअकुमारं अहिलसंती अत्तणवि तावल्लज्जेमीत्यादिना इमिणा पुरदो विअ देसो*) कुमारो इत्यन्तेन समागमेच्छानुरूपः मुख्यकार्यहेतुरनुरागो बिन्दुः। एवं निशिशरशतेन समागमेच्छारूपः मुख्यकार्यहेतुरनुरागो बिन्दुः। मतान्तरे ज्ञापकमङ्गस्फुरणमपि बिन्दुः। एवं निशितशरेत्यारभ्य लङ्केश्वरमनसि समाहितमानवभयपूर्वावतार इत्यादिना पराक्रमोत्साहप्रभावादिरवान्तरकार्यस्य बिन्दुः। गोमुखः - *वअस्स तुमं खु जुअराआत्त दोसिदनछत्तं संभावीअदि* इत्यवान्तरकार्यराज्यलाभस्य च विन्दुः। किञ्चाग्रे सारिकाहंसवृत्तान्तेन कार्यस्याप्रसङ्गे हंसः *भट्टिदारिए इमाएवि पाणिग्गहणनिमित्तं अणो कोवि हरचावो अणोसीअदि* इति प्रागुक्त्वा चापारोपणबीजस्यापि पुनर्बिन्दुत्वम्। बिन्दूनामेषां प्रागुक्तबीजसामान्यलक्षणक्रान्तत्वं स्फुटमेव। यथा - मालविकाग्निमित्रे - मालविका चित्रदर्शनजन्यः आउत्त एसा मालविएति कुमारीवाक्यार्थबोधनजन्योऽनुरागो बीजम्।[४८] मध्ये कार्यस्यात्रप्रसङ्गे पितृव्यपुत्रो भवतः कुमारो माधवसेनः प्रतिश्रुतसम्बन्ध इति सम्बन्धाङ्गीकारो बिन्दुः। तदग्रे पुनः हरदत्तगणदासयोर्विवादो मालविकासमागमहेतुर्बिन्दुः। प्रधानैकरसे प्रबन्धे मुख्यस्य स्थायिभावाख्यबीजस्य प्राधान्यमावश्यकम्। यथा प्रकृते। मालती-शकुन्तला-रत्नावली-मालविकाग्निमित्रादौ रत्याख्यानुरागस्थायिभावस्य क्वचित् सहकार्यादपिप्राधान्ये, यथा वीररसप्रधाने वेणीसंहारे स्थायिभावयुधिष्ठिरसहकारिणः क्रोधस्य प्राधान्यमिति बोध्यम्।

## पञ्चावस्थाविचारः

पताकाप्रकरीवृत्तलक्षणं - प्रागुक्तमेव। यथा सुखार्थिभिः प्रारब्धस्य कार्यस्य पञ्चावस्थाः। तदुक्तम् -

---

[४८] Reference is to the dialogue between Bakulāvalikā and Kaumudikā in the *Miśraviṣkambhaka* of the first act in *Mālavikāgnimitram*. The exact sentence uttered by Bakulāvalikā is - तदो कुमारिए वसुलच्छीए आअक्खिदम् - अज्ज, एसा मालविएति। (ततः कुमार्या वसुलक्ष्म्या आख्यातम् - आर्य, एषा मालविकेति)।

अवस्थाः पञ्च कार्यस्य प्रारब्धस्य फलार्थिभिः।
आरम्भयत्नप्राप्त्याशानियताप्तिफलागमाः।।[४६]

तत्र

औत्सुक्यमात्रमारम्भः फललाभाय भूयसे।[५०]

औत्सुक्यम् – उत्सुकस्य कार्योन्मुखस्य धर्मः कार्यानुकूलो ज्ञानेच्छाकृत्यादिरूपः। स च नायकनायिकानिष्ठस्तदन्यनिष्ठो वा। यथा – प्रकृते जनकस्य सन्देहचिन्तारूपं ज्ञानमात्रमारम्भः। नायकनायिकानिष्ठः अनुरागोऽपि मालत्यां कामन्दकी – अपि नाम तयोर्भूरिवसुदेवरातापत्ययोर्मालतीमाधवयोरभिमतः पाणिग्रहः स्यादितिमात्रमारम्भः। रत्नावल्याम् प्रारम्भेऽस्मिन् स्वामिनो वृद्धिहेतावित्यादिना इदमहं सम्पादयामीति यौगन्धरायणस्यान्यकृतिमात्रमारम्भः। मालविकाग्निमित्रे मालविकाचित्रप्रत्यक्षं शाब्दमालविकाबोधः तदनुरागश्च नायकनिष्ठः कार्यारम्भः। मुखसन्धौ स्थायिभावाख्यबीजस्यावश्यं समुत्पत्तिः।। तत्रारम्भस्य चावश्यमन्तर्भावः। परन्तु स्वातन्त्र्येण क्वचिदारम्भस्य निबन्धनं चमत्काराधायकमिति बोध्यम्।

**अथ प्रयत्नः।**

प्रयत्नस्तु तदप्राप्तौ व्यापारोऽतित्वरान्वितः।[५१]

तस्य कार्यस्याप्राप्तौ कार्यानुकूलः कृतिव्यापारसाधारण आयासः प्रयत्नः। स च नायकनायिकानिष्ठस्तदन्यनिष्ठो वा। यथा – प्रकृते – द्वितीयेऽङ्के प्रतिमुखसन्धौ यदिदानीमार्यबद्धकङ्कणं तस्याः सुकुमारकरतलकोकनदं मम करकिसलये वर्तत इवेत्याकलयामीति व्यङ्ग्या रामनिष्ठाकृतिः प्रयत्नः। एवमग्रेऽपि यथादिशन्ति गुरव इति चापारोपणानुकूलः मालत्यां गदोअ तत्थ माहवो इति कथं च वत्स मामनवधानां मन्यसे इति च। न खलु महामांसविक्रयादन्यदुपायान्तरं पश्यामीति च मालतीसमागमानुकूलः कामन्दकीमाधवनिष्ठो व्यापारः प्रयत्नः। मालविकाग्निमित्रे – विदूषकः – विणाये हिअणुगिहीदम्हि इमिणा णिओहएण किन्तु सा तत्र तवस्सिणी देवीए अहिअअरं रक्खिज्जंतीए णाअरखिदा विअणि–हीणसुहं समासदिइउदव्या। तहावि जतिस्सं इति वाग्व्यापारो राजनिष्ठोनियोगः वकुलावलिकानिष्ठो यत्नश्च प्रयत्नः।[५२] एवमन्यदपि बोध्यम्। प्रतिमुखसन्धौ

---

[४६] DR I.19.

[५०] DR I.20.

[५१] DR I.20.

[५२] This is reference to the endevours of Bakulāvalikā for uniting Agnimitra and Mālavikā in the third act of *Mālavikāgnimitram*. Vidūṣaka narrates what Bakulāvalikā told him "अणुग्गहीदम्हि इमिणा णिओएण। किंदु सा →

प्रयत्नं बिना बीजस्य लक्ष्यत्वासम्भवात् तत्र यत्नः आवश्यकः। परं तस्मिन् सन्धौ सकृदसकृद्वा स्वातन्त्र्येण क्वचिद्यत्ननिबन्धनं चमत्कारकारीत्यवधेयम्।

**अथ प्राप्त्याशा।**

अपायापायशङ्काभ्यां प्राप्त्याशा प्राप्तिसम्भवः।[५३]

अनिर्धारितैकान्तः प्राप्तिसन्देहः प्राप्त्याशा। सा च प्रकारद्वयेन। सत्यां प्राप्तौ चापायसद्भावात् सत्यामप्राप्तावुपायसद्भावाद्वा च। द्विधापीयं गर्भसन्धौ बीजस्यालक्ष्यत्वे पुनर्गर्भसन्धौ बीजस्य उपायान्तरसाहित्यादिना सविशेषोद्भेदं विना प्राप्तेरसम्भवात् बीजस्य सविशेषोद्भेद आवश्यकः ततश्च प्राप्तिरिति बोध्यम्। गर्भसन्धौ यत्र क्वचिद्यथायोगमुपायापायसद्भावः सकृदसकृद्वा दर्शनीयः। यथा प्रकृते चतुर्थाङ्कादितो गर्भसन्धौ समागमप्रतिबन्धक-परशुरामप्रतीकाररूपोपायान्तरेण प्रागुक्तपराक्रमानुरागबीजस्य सविशेषोद्भेदः ततश्च निर्विघ्नसीताप्राप्तिः। रामस्तु लक्ष्मणविदेहसुतैकसार्थः रामस्ताभ्यां सह गुरुजनं प्रणम्येत्यादिषु व्यक्तांस्तदनुकबन्धप्रभृतिदूषितायां दण्डकायां रावणेन सीतापहरणे प्रस्तुते इत्यादिना वापायसद्भावनप्राप्त्याशा। ततश्च रावणेन सीतापहरणेनाप्राप्तसुग्रीवविभीषणसहायरूपोपायसद्भावेन राघवेण जगज्जितम्। जेतारं जामदग्न्यस्य कण्ठीरवेणरिपुकुम्भिकदम्बकानीत्यादिना कार्यप्रत्यर्थिदनुकबन्धवालिमेघनादादिवधक्षमपराक्रमादिना परुषोपायसद्भावेन प्राप्त्याशा। पताकाया अनियतत्वेन प्राप्त्याशामूलकत्वेनैवाग्रे गर्भसन्धेर्वक्ष्य-माणत्वात्। गर्भसन्धिस्वरूपमपीदमेव। मालत्यां षष्ठाङ्कमारभ्याष्टमाङ्कान्ते गर्भसन्धौ कपालकुण्डलायाः - दुरात्मन् मालतीनिमित्तव्यापादितास्मद्गुरो इत्यादिनापायापायसद्भावः। ततश्चानुरागस्वयंग्राहसाहसैकबीजस्य च सविशेषोद्भेदः। ततश्च मालतीप्राप्तिरित्येवं प्राप्त्याशा। ततश्च कपाल-कुण्डलया मालत्यां हरणाद् प्राप्तिः ततश्च सौदामनीस्फुरणचञ्चलमेव सौख्यमिति सूचितकामन्दकीशिष्यसौदामनीरूपोपायसद्भाव इत्येवं प्राप्त्याशा। मालविकाग्निमित्रे चतुर्थाङ्के गर्भसन्धौ सर्पदंशनिमित्तधारिणीमुद्रिकानयनबन्धनमोचनाद्युपायान्तर-साहित्येनानुरागबीजस्य सविशेषोद्भेदेन मालविकासमागमः।

राजा - (साशङ्कम्) वयस्य, एषा कुसुमावचयव्यग्रहस्ता सख्यास्ते इरावत्याः परिचारिका चन्द्रिका सन्निकृष्टमागच्छति।

---

← तवस्सिणी देवीए अहिअं रक्खंतीए आअरक्खिदो विअ णिही ण सुखं समासेदिइउदव्वा (अनुगृहीताऽस्मि अनने नियोगेन। किन्तु सा तपस्विनी देव्या अधिकं रक्षन्त्या नागरक्षित इवं निधिः न सुखं समासादयितव्या।)

[५३] DR I.21.

विदूषकः – अहो कुलीलएहिं कामुएहिं परिहरणीआ चंदिआ इत्यपायसद्भावेन प्राप्त्याशा ततश्चमालविकाया प्राप्तिः।

नेपथ्ये – (*अच्चरिअं अच्चरिअं अपुणे पंचरत्ते दोहलस्स मउलेहिं सणद्धोतनणीआमोओ जाव देवीए णिवेदेमि।*)

उभे – (श्रुत्वा प्रहृष्टे)

बकुलावलिका – आसासदु सही सच्च वइणा देवी

इत्यपायसद्भावेन प्राप्त्याशा।

**अथ नियताप्तिः।**

अपायाभावतः प्राप्तिर्नियताप्तिस्तु निश्चिता।[५४]

अपायाभावान्निर्धारितैकान्तफलप्राप्त्यवमर्शरूपः प्राप्तिनिश्चयो नियताप्तिः। यथा प्रकृते – तातेन यातेन दिवं प्रवृत्तः कोऽप्येष करुणाविरहैर्विमिश्र इत्यादिना समागमप्रत्यर्थिदनुकबन्धवालिमेघनादकुम्भकर्णरावणवधादवधारितैकान्त-सीतासमागम-पर्यालोचनरूपावमर्शनं नियताप्तिः। प्रकरीवृत्तस्यानियतत्वेन नियताप्तिमूलकत्वेनैवावमर्शसिद्धेर्वक्ष्यमाणत्वादवमर्शसन्धिस्वरूपमपीदमेव।

**अथ फलागमः।**

समग्रफलसम्पत्तिः फलयोगो यथोदितः।[५५]

अत्र शुद्धानुगं फलानुरोधात् केवल्येन फलान्तरसाहित्येन वा समग्रफलस्य सम्पत्तिरित्येवं व्याख्या। फलान्तरसाहित्यादिसामस्त्येन प्रधानैकफलनिर्वाह इति फलितोऽर्थः। कार्यरूपप्रधानफलस्यार्थकृतिमध्य एवोक्तत्वादनेन फलान्तरसाहित्यमात्रं विधीयते। यथा प्रकृते सप्तमेऽङ्के विजयराज्यलाभफलान्तरानुबन्धेन सीतासमागमरूपप्रधानफलनिर्वाहः।

## सन्धिविचारः

**अथपञ्चसन्ध्युपपादनम्।**

अर्थप्रकृतयः पञ्च पञ्चावस्थासमन्विताः।

---

[५४] DR I.20.

[५५] DR I.22.

यथासंख्येन जायन्ते मुखाद्याः पञ्चसन्धयः।।[५६]

आरम्भयुक्तानि बीजानि मुखसन्धिः। तत्र बीजेऽपि प्रागुक्तयुक्त्या आरम्भस्य च स्वयमन्तर्भावात् बीजसमुत्पत्तिर्मुखसन्धिरिति लक्षणमुपपन्नम्। प्रयत्नयुक्तो बिन्दुः प्रतिमुखम्। तत्र तावत् प्रधानबीजस्य प्रयत्नसंयोगाल्लक्ष्यत्वमावश्यकम्। गर्भसन्धौ च प्रधानबीजस्य सविशेषोद्भेद आवश्यकः। अत्र लक्ष्यत्वानन्तरमन्तरा पुनर्बीजस्यालक्ष्यत्वे अवान्तरार्थविच्छेदस्वरूपे गर्भसन्धौ कार्यप्रसङ्गकर्तृत्वेन मुख्यबीजस्य बिन्दुसंज्ञानिष्पत्तिनैष्पत्यम्। तथा सति सन्धिद्वयेऽपि मुख्यबीजाभेदेनप्रतिमुखसन्धावपि तस्यबीजस्य बिन्दुसंज्ञानिष्पत्तिनैष्पत्येन तस्य वीजस्य लक्ष्यालक्ष्यतयोद्भेदः प्रतिमुखसन्धिरितिलक्षणमुपपन्नम्। इत्येव प्रतिमुखसन्धौ बिन्दुसंज्ञानैष्पत्ये बीजस्य लक्ष्यालक्ष्यतयोद्भेदः। मुखसन्धावपि प्रतिमुखसन्धावपि बिन्दुसंज्ञासम्पादनम् तत्र चमत्कारकारीति बोध्यम्। यथा रत्नावल्याम् – मुखसन्धावपि मदनपूजादिनार्थविच्छेदे कधं एसो सो उदअण-नरिंदो इत्यादिनाऽनुरागबीजस्य सम्बन्धाङ्गीकरणस्य च बिन्दुसंज्ञासम्पादनम्। शकुन्तलायां मृगयावर्णनादिनाऽर्थविच्छेदे राजा – तामाश्रमललामभूतां शकुन्तलामधिकृत्य ब्रवीमीत्यादिना प्रतिमुखसन्धावप्यनुरागबीजस्य बिन्दुत्वसम्पादनम्। प्रकृते – मुखादिसन्धित्रयेऽपि वीजस्य विन्दुत्वसंज्ञासम्पादनम्। पताकावृत्तस्यानियतत्वेनप्राप्त्याशयैव गर्भसन्धिः। स च प्रागुपपादित एव। एवं च प्रकरीवृत्तस्याप्यनियतत्वेन नियताप्त्यैवावमर्शसन्धिः। फलान्तरसाहित्येन मुखकार्यरूपफलनिर्वाहो निर्वहणसन्धिरिति सर्वमुपपन्नम्।

**अथ सन्धिसामान्यलक्षणम्।**

अन्तरैकार्थसम्बन्धः सन्धिरैकान्वये सति।[५७]

मुख्यप्रयोजनसम्बन्धे सति कथांशानामवान्तरैकप्रयोजनसम्बन्धः सन्धिः। तत्र मुखप्रतिमुखसम्बोध्यबीजनैष्पत्येन तत्रत्यकथांशानां बीजरूपान्तरैकार्थसम्बन्ध आवश्यकः। एव प्रतिमुखगर्भसन्ध्योरपि। इत्थं च गर्भावमर्शसन्ध्योः प्राप्तिसम्बन्धः। अवमर्शनिर्वहणसन्ध्योश्च कार्यसम्बन्ध आवश्यक इति।

**अथ सन्धिसंज्ञा।**

मुखं प्रतिमुखं गर्भः सावमर्शोपसंहृतिरिति।[५८]

---

[५६] DR I.22.

[५७] DR I.23.

[५८] DR I.23.

**अथ सन्धिविशेषलक्षणम्।**

मुखं बीजसमुत्पत्तिर्नानार्थरससम्भवा।
अङ्गानि द्वादशैतस्य बीजारम्भसमन्वयात्।।[५९]

नानाप्रकारकार्यस्य रसस्य च सम्भव उत्पत्तिर्यतः सा बीजानां समुत्पत्तिर्मुखसन्धिः। प्रहसनादौ तु हास्यरसात्मकमुखहेतुत्वेन हासादिस्थायिभाव एवार्थरूपं कार्ये, अत्र प्रधानप्रधानेतर यत्किञ्चिद्बीजसमुत्पत्तिर्मुखसन्धिरिति निष्कर्षः। अत एव रत्नावल्यां रत्नावली प्राप्तिहेतुदेवीप्रसादरूपमपरं बीजं गर्भसन्धावुक्तं सङ्गच्छते। यथा प्रकृते – प्रविश्य शतानन्द इत्यारंभ्य कुसुमकोमलप्रकृतिः खल्वियं कुमारी लोक इतीत्येतेन त्यागसमयचिन्तापराक्रमातिशयचापा-रोपणानुरागादिबीजानां सीतासमागमस्य प्रधानशृङ्गाररसस्य च हेतूनां अवान्तरकार्यात्मविजयराज्यलाभहेतूनां सीताहरणरावणनिग्रहयौवराज्यत्वादीनां च समुत्पत्तिर्मुखसन्धिरिति कौशलं मुखसन्धेश्च बीजारम्भद्योतकानि द्वादशाङ्गानि भवन्ति। तत्रारम्भस्यान्तर्भावान्मुखसन्ध्यङ्गानि बीजप्रदर्शकानि प्रयत्नान्तर्भावाच्च प्रतिमुखसन्ध्यङ्गानि बिन्दुप्रदर्शकानि। गर्भसन्ध्यङ्गानि प्राप्त्याशा प्रदर्शकानि। अवमर्शसन्ध्यङ्गानि नियताप्तिप्रदर्शकानि निर्वहणसन्ध्यङ्गानि च मुख्यावान्तर-कार्यप्रदर्शकानि वाच्यत्वव्यङ्ग्यत्वतादात्म्यविशेषणविशेष्यभावकार्यकारण-प्रयोज्यप्रयोजकलाभैककार्यत्वैककारणत्वविरोधादिसाक्षात्परम्परासम्बन्धेन विधेयानीति निष्कर्षः।

**अथ मुखसन्ध्यङ्गानि।**

उपक्षेपः परिकरः परिन्यासो विलोभनम्।
युक्तिः प्राप्तिः समाधानं विधानं परिभावना।।
उद्भेदः करणं भेदोऽन्वर्थानीत्यथ लक्षणम्।।

अत्रानन्तरोक्तसाक्षात् परम्परासम्बन्धेन सर्वाणि पञ्चसन्ध्यङ्गानि कार्यप्रदर्शकानि विधेयानीति अन्वर्थानि स्वसंज्ञालक्षणानि।

अथैतेषां सुखार्थविशेषलक्षणानि। तत्र बीजन्यास उपक्षेपः।[६०] बीजस्य न्यसनमुपक्षेपणम्। स्वल्पत्वेनोद्देश उपक्षेपः। यथा प्रकृते विषयराजपराङ्मुखेत्यादिपद्येन शतानन्दः प्रागुद्दिष्टवीजान्युपक्षिप्तवान्।

**अथ परिकरः।**

तद्बाहुल्यं परिक्रिया। तस्य वीजस्य विस्तारेण प्रपञ्चनं परिकरः। यथा प्रकृते

[५९] DR I.24-25.

[६०] DR I.27.

तथाहीत्यारभ्य अविनिर्गता (अपि निर्गता) इत्यन्तेन बीजानां विस्तारेण प्रपञ्चनं परिकरः।

**अथ परिन्यासः।**

तन्निष्पत्तिः परिन्यासः।[६१]

यथा प्रकृते महाराज मैथिलायेत्यादिना भगवतो भविष्यतीत्यन्तेन रामसीतासमागमस्य निष्पन्नप्रायत्वेन कथनाच्चिन्तापराक्रमचापारोपणादिबीजानां निष्पत्तिः परिन्यासः। एतेषां त्रयाणामङ्गानां वाच्यत्वादिसाक्षात्सम्बन्धेन चिन्ताचापारोपणादि बीजान्वयित्वं अत्राङ्गस्यैकविधायित्वेन पुनरेककार्यत्वसम्बन्धेन तदपरबीजान्वयित्वं सुघटमत एव दशरूपकेऽङ्गानि प्रायः प्रधानबीजानुगतान्युक्तानीति बोध्यम्।

**अथ विलोभनम्।**

गुणाख्यानं विलोभनम्।[६२]

यथा प्रकृते परिम्लानैरित्यादि पद्येन कार्यकारणसम्बन्धेनानुरागबीजानुविधायि गुणवर्णनं विलोभनम्।

**अथ युक्तिः।**

सम्प्रधारणमर्थानां युक्तिः।[६३]

अर्थानां प्रयोजनानां अवधारणं युक्तिः। यथा प्रकृते – कुशिकनन्दनोपीत्यादिना समागमिष्यतीत्यन्तेन जनकगृहासन्नमिथिलास्थयाज्ञवल्क्यगृहे रामागमनस्य सीतादर्शनानुरागादिप्रयोजनावधारणं युक्तिः। अत्र रामागमनस्य प्रयोजन-भावसम्बन्धिनानुरागबीजानुविधायित्वं बोध्यम्। किञ्च लङ्केश्वरमनसि समाहितमानवभयपूर्वावतार इति विलक्षणमनुजनिष्ठपराक्रमस्य हरणानन्तरं पुनः सीतासमागमरूपप्रयोजनावधारणं युक्तिः। मालत्यां प्रथमेऽङ्के – सौदामनी-प्रसङ्गेऽस्य कपालकुण्डलाकृतहरणानन्तरं पुनर्मालतीसमागमरूपप्रयोजनावधारणं युक्तिः। मालविकाग्निमित्रे प्रथमेऽङ्के धारिणीमुद्रिकाप्रसङ्गस्य बन्धनमोचनद्वारा मालविकासमागमरूपप्रयोजनावधारणं युक्तिः।

**अथ प्राप्तिः।**[६४]

**अथ समाधानम्।**

---

[६१] DR I.27.

[६२] DR I.27.

[६३] DR I.27.

[६४] Both the Mss. omit the definition of *prāpti*. प्राप्तिः सुखागमः – DR I.27.

बीजागमः समाधानम् ।[६५] आगम उपादानम् ।

यथा प्रकृते पीयूषसवनेनेत्यादिना अनुरागबीजस्य पुनरुपादानं समाधानम् ।

**अथ विधानम्।**

विधानं सुखदुःखकृत्

यथा प्रकृते एवं नामास्वस्थहृदयामित्यादिना कुमारीलोक इत्यन्तेन सदृशानुरागजनिततादृशसीतावस्था मैत्रेय्याः सुखदुःखकारिणीपरम्परासम्बन्धेनानुरागबीजानुगता विधानम् ।

**अथ परिभावना।**

परिभावोऽद्भुतावेशः ।

यथा प्रकृते - अहो राजकुलसम्पर्केणेत्यादिकरणं दिष्ट्या वर्धामहे इत्यादिना प्रकृतेऽनुरागबीजान्वयेनाद्भुतरसावेदाः परिभावनः ।

**अथोद्भेदः।**

उद्भेदो गूढभेदनम् ।[६६]

यथा प्रकृते - सूनृते दिष्ट्या वर्धामहे इत्यादिना स्वप्ने चित्रे वाऽवलोकित इत्यन्तेन गूढस्यानुरागबीजस्य रामविषयत्वेनोद्भेदनानुद्भेदः ।

**अथ करणम्।**

करणं प्रकृतारम्भः ।[६७]

यथा प्रकृते सागरिका सकोपमित्यादिना मणोरहरुरखा- ण्णेत्यन्तेनानुरागबीजान्वयेन प्रकृतदर्शनारम्भकरणं करणम् ।

**अथ भेदः।**

भेदः प्रोत्साहना मता ।[६८] यथा प्रकृते स्वप्नेऽपि रमते यत्रेत्यादिपदेनानुरागबीजानुगुण्यैनैव प्रोत्साहना भेदः। लक्ष्यग्रन्थेषु वैपरीत्येनापि दर्शनादङ्गानां क्रमो न विवक्षितः। मुखसन्धावुपक्षेपपरिकरपरिन्यासयुक्त्युद्भेदसमाधानानामवश्यम्भविता उपधेयसङ्करेऽप्युपाधेयसङ्करादिति न्यायादेकाङ्गलक्ष्येप्यपराङ्गलक्ष्यत्वम-विरुद्धम् ।

---

६५ DR I.28.

६६ DR I.29.

६७ DR I.29.

६८ DR I.29.

**अथ प्रतिमुखसन्धिः।**

लक्ष्यालक्ष्यतयोद्भेदस्तस्य प्रतिमुखं भवेत्।
बिन्दुप्रयत्नानुगमादङ्गान्यस्य त्रयोदश।[६९]

मुखसन्धौ प्रधानबीजप्रकाशननैष्पत्ये तस्य मुखसन्धिप्रकाशितप्रधानबीजस्य पूर्वलक्ष्यतया पश्चादलक्ष्यतया प्रकाशनं प्रतिमुखसन्धिरित्यर्थः। अत्रैकबीजस्य लक्ष्यालक्ष्यत्वे यथायोगमपरबीजानां लक्ष्यत्वप्रकाशनं लक्ष्येषु सङ्गच्छते। यथा प्रकृते सूनृते क्व पुनरिदानीं वत्सेत्यारभ्यातृतीयाङ्कान्तं प्रतिमुखसन्धिः।

तत्र सूनृते क्व पुनरित्यादिना इति निष्क्रान्ते स्त्रियौ इत्यन्तेनानुरागचापारोपणादि बीजानां लक्ष्यत्वप्रकाशनं ततश्च परशुरामप्रवेशेनातृतीयाङ्कान्तमलक्ष्यत्वप्रकाशनम्। मालत्यां तृतीयाङ्कमारभ्या पञ्चमाङ्कान्ते प्रतिमुखसन्धौ अवलोइदे अविणाम जाणासीत्यादिना जाणादि महाभाअधेओ जणो। अवसरे भणिज्झं मतिदु इत्यन्तेनानुरागवीजस्य लक्ष्यतया प्रकाशनं ततश्च नन्दनसम्प्रदानकमालतीप्रदानश्रवणमारभ्यापञ्चमाङ्कान्तं लक्ष्यतया प्रकाशनम्। मालविकाग्निमित्रे तृतीयाङ्करूपे प्रतिमुखसन्धौ आदित आरभ्य धृतिपुष्पमयमपि जनो बध्नाती[७०] त्यादि पद्यान्तेनानुरागबीजस्य लक्ष्यतयोद्भेदः। तत इरावतीप्रवेशादातृतीयाङ्कान्तमलक्ष्यतया च प्रकाशनं बिन्दुप्रयत्नानुगमादित्यादि तु गतार्थमेव। प्रकृते चेटीद्वारकसीतासमागमकारणसूर्यास्तोदयविरहवर्णनादिना कार्यप्रसङ्गविच्छेदे समीहितं जातमेवेति कार्यस्योक्तावप्रस्तुतमंशयाकारणस्य (संशयकारणस्य?) व्यञ्जनरूपे अनुरागचापारोपणादि बीजानां प्रतिमुखसन्धावपि बिन्दुसंज्ञा सम्पादनं किञ्चन निजकौशलम्।

**अस्याङ्गानि।**

विलासः परिसर्पश्च विधूतं शर्मनर्मणी।
नर्मद्युतिः प्रगमनं निरोधः पर्युपासनम्।
वज्रं पुष्पमुपन्यासो वर्णसंहार इत्यपि।[७१]

**तत्र**

रत्यर्थेहा विलासः स्यात्।[७२]

---

[६९] DR I.30.

[७०] धृतिपुष्पमयमपि जनो बध्नाति न तादृशं चिरात् प्रभृति।
स्पर्शामृतेन पूरय दोहदमस्याप्यनन्यरुचेः।। Mālavikāgnimitram III.19

[७१] DR I.31-32.

[७२] DR I.32.

यथा भट्टिदारिआ वितहितेद्य गदा इत्यादिना रामसमागम इति समुद्दिश्य सीतासूनृतादीनामीहाचेष्टा बिन्दुरूपानुरागवीजानुगतो विलासः।

**अथ परिसर्पः।**

दृष्टस्य ततो नष्टस्य बीजस्य पुनरनुसरणं परिसर्पः।[७३]

यथा प्रकृते - वचनविषयातीतेत्यादिना वर्तत इवेत्याकलयामीत्यन्तेन दृष्टस्यानुरागपराक्रमचापारोपणबीजस्यान्तरा पुनः पौलस्त्यपुरोहितप्रवेशालापादिना नष्टस्य वत्स रामभद्र विधीयतामाङ्गिरसवचनमित्यादिना साभ्यसूयमिव पश्यन्ती तिष्ठतीत्यन्तेन पुनरनुसरणं परिसर्पः।

**अथ विधूतम्।**

विधूतं स्यादरतिः।[७४] यथा प्रकृते - रामः - वत्स लक्ष्मण, सर्वसमीहितं सान्तरायमित्यन्तेन यद्वा सीता णहिणहि इत्यादिना अनुरागबिन्द्वनुगता अरतिः विधूतम्।

**अथ शमः**

तच्छमः शमः।[७५] तस्या अरतेरुपशमः शमः।[७६]

**अथ नर्म।**

परिहासवचो नर्म।[७७] यथा - प्रकृते - प्रिये भवत्या गाढोत्कण्ठेत्यादिनानुरागबीजान्वितं परिहास वचो नर्म।

**अथ नर्मद्युतिः।**

धृतिस्तज्जा द्युतिर्मता।[७८] नर्मजा धृतिस्तज्जा नर्मजा द्युतिर्नर्मजा द्युतिरित्यत्यर्थः। यथा प्रकृते - सम्मितं णिओ एवं हिमं जधेत्यादिना सीता - सलज्जानन्दम् साभ्यसूयमिव पश्यन्ती तिष्ठतीत्यन्तेनानुरागबीजानुगता नर्मजा द्युतिर्नर्मद्युतिः।

**अथ प्रगमनम्।**[७९]

यथा प्रकृते - सीता सत्त्वरं परिक्रम्य शनैः सानुरागमित्यादिनाऽवनतान-

---

[७३] DR I.32 says - दृष्टानुसर्पणं परिसर्पः।

[७४] DR I.33.

[७५] DR I.33.

[७६] The Ms. does not give any example of *Śama*.

[७७] DR I.33.

[७८] DR I.33.

[७९] Ms. omits the definition of *pragamana*, DR I.33.

नतामभिनयतीत्यन्तेन रामसीता सीतासूनृतानामुत्तरोत्तरानुरागप्रकाशकानि वचनानि प्रगमनम्।

**अथ निरोधः**

हितरोधो निरोधनम्।[८०]

यथा प्रकृते – प्रिये गुरुरयं तदभ्यन्तरं प्रविश्येत्यादिना परशुरामप्रवेशेनानुराग-कार्यसमागमस्वरूपहितस्य निरोधो विरोधाख्यसम्बन्धेनानुरागबीजानुगतो निरोधः।

**अथ पर्युपासनम्।**

पर्युपास्तिरनुनयः यथा प्रकृते – रामः गृहीत्वाऽञ्जलिं वक्षसि निधायेत्यादिना कथय सीतेत्यन्तेनानुरागबीजान्वयेन सीतायाम् अनुनयः पर्युपासनम्।

**अथ पुष्पम्।**[८१]

पुष्पं वाक्यविशेषवत्।

यथा प्रकृते – तुष्टे तु त्रिविलोचने इत्यादि किं वाऽस्मत्प्रभोरेव मतिविपर्यय इत्यन्तं सीतारामसमागमप्रतिकूलनेन मतिविपर्यय इत्यन्तेन पुनस्तदनुकूलत्वेनाप्यनुरागविन्द्व नुगतं सविशेषवाक्यं पुष्पम्। यद्वा प्रथमात् प्रमदोद्याने प्रदर्शनादित्यादि पद्यं सविशेषानुरागप्रकाशकं वाक्यं पुष्पम्।

**अथ वज्रम्।**

वज्रं प्रत्यक्षनिष्ठुरम्।[८२]

यथा प्रकृते किमिदमस्माकमित्यादिना परिणेष्यतीत्यन्तेन समागमविरोधित्वेन परस्परानुरागबिन्द्वनुगतं प्रत्यक्षनिष्ठुरं वचनं वज्रम्।

**अथोपन्यासः।**

प्रसादनमुपन्यासः। यद्वा उपन्यासस्तु सोपायम्।

यथा प्रकृते – रामः – अपि प्रिये सर्वथेत्यादिना मामभिगमनायेत्यन्तेन पूर्ववाक्येन प्रसादनमुत्तरवाक्येनोपपत्तियुक्तमुपन्यासनं वाऽनुरागान्वितो द्विविधोऽप्ययमुपन्यासः।

---

[८०] DR I.34.

[८१] DR I.34.

[८२] DR I.34.

**अथ वर्णसंहारः।**

चातुर्वर्ण्योपगमनं वर्णसंहार इष्यते।[८३]

यथा प्रकृते भो भो सर्वे ब्राह्मणा राजानश्चान्ये चेत्यादिना पर्शुणाऽहं छिनद्मीत्या[८४] शंसनेनानुरागकार्यसमागमप्रतिकूलत्वेन परम्परया-ऽनुरागबीजानुगतं विघ्नविघातविद्याविदग्धयोगीश्वरीनमनसूचितेन गर्भबालादि-क्षत्रवधीकरणरूपभार्गवदुर्नयोद्भेदसूचितेन च भार्गवपराजयेन पुनरनुकूलत्वेनापि तदनुगतं ब्राह्मणक्षत्रियादिचतुर्वर्णानामुपगमनं वर्णसंहारः।

प्रतिमुखसन्धौ च परिसर्पप्रगमनवज्रोपन्यासपुष्पाणां प्राधान्यमितरेषां यथासम्भवं प्रयोगः।

**अथ गर्भसन्धिः।**

गर्भस्तु दृष्टनष्टस्य बीजस्यान्वेषणं मुहुः।
द्वादशाङ्गः पताका स्यान्न वा स्यात् प्राप्तिसम्भवः।[८५]

प्रतिमुखसन्धौ दृष्टनष्टस्य लक्ष्यालक्ष्यतयोद्भिन्नस्य बीजस्यान्वेषणं सविशेषोद्भेदः मुहुः मुहुः प्राप्त्या। एवं च वास्य सम्भवः। प्रागुक्तप्राप्त्याशा गर्भसन्धिः स्यात्। स च द्वादशाङ्गः। तत्र चौत्सर्गिकत्वेन प्राप्ता पताका स्यान्न वा स्यात्। एवं च बीजस्य सविशेषोद्भेदेन सापायसद्भावापि सोपायसद्भावा चाप्राप्तिर्गर्भसन्धिरिति निगलितोऽर्थः। तदुक्तं भरते -

उद्भेदस्तस्य बीजस्य प्राप्तिरप्राप्तिरेव च।
उपायान्वेषणं यत्र स गर्भ इति कीर्त्यते।।[८६] इति।

अत्रापायसद्भावमन्तरेणाप्राप्तेरसम्भवादपायसद्भाव आक्षेपलभ्य इति बोध्यम्। यथा प्रकृते - चतुर्थाङ्कमारभ्यापञ्चमाङ्कं विष्कम्भकं गर्भसन्धिः। स च प्रागुपपादित एव। अत्राधिकारिकवृत्तसहायभूता सुग्रीवविभीषणवृत्तान्तरूपा पताकाप्यस्ति। किञ्च राज्यलाभरूपावान्तरकार्यस्य पांशुभिः क्रीडितं याभ्यामित्यादिना सापाया प्राप्तिः। चतुर्दशवर्षावधिदानेन सोपाया प्राप्तिः। देव निस्सन्देहमनेनेत्यादिना जगद्विजयोपलक्षणेन च सोपायेति कौशलम्।

---

[८३] DR I.35.

[८४] पर्यशोहं छिनसी - in Ms. A; पापशोऽहं छिनसासंशनेन in Ms. B. Both the readings do not make any sense. I have tried to construct a nearest possible reading as per the context.

[८५] DR I.36.

[८६] NŚ IXX.41 reads differently in the second half - पुनश्चान्वेशणं यत्र स गर्भ इति संज्ञितः।

**अथाङ्गानि।**

अभूताहरणं मार्गो रूपोदाहरणे क्रमः।
सङ्ग्रहश्चानुमानं च तोटकाधिबले तथा।।
उद्वेगसम्भ्रमाक्षेपा लक्षणं च प्रणीयते।[८७]

अभूताहरणं छद्म।[८८]

यथा प्रकृते - महामन्त्रिमाल्यवतादिष्टशूर्पणखाविष्टेत्यादिना पत्रिकादिरूपं पद्मवनगमनोपक्षेपकत्वेन प्राप्त्या शापप्रदर्शकमभूताहरणम्। वनगमनस्य तु सीतायाः साहचर्येण प्राप्तिः। देव निस्सन्देहमनेनेत्यादिना जगद्विजयोपक्षेपेण प्राप्तेः प्रदर्शकत्वेन हरणं प्रयोजकत्वेनाप्राप्तेरपि प्रदर्शकत्वम्। अत्रापायोपायसद्भावात् प्राप्तेरपिप्रदर्शकान्यङ्गानि प्राप्त्याशाप्रदर्शकान्यङ्गानि प्राप्त्याशाप्रदर्शकानीति बोध्यम्।

**अथ मार्गः।**[८९]

मार्गस्तत्त्वार्थकीर्तनम्।

यथा प्रकृते - पांशुभिः क्रीडितं याभ्यामित्यादिपद्येन निश्चितार्थकथनं समागमप्रतिबन्धकभार्गवनिग्रहोपक्षेपकत्वेन समागमप्रीतिप्रदर्शकं मार्गः। यद्वा उपक्षिप्तराज्यलाभस्य भोगसामग्रीसम्पादनद्वारा समागमप्राप्तिप्रदर्शकत्वम्। अथवा मातुर्नियोगो विपरीतवृत्तिरित्यादिना मार्गः।

**अथ रूपम्।**[९०]

रूपं वितर्कवद् वाक्यम्।

यथा प्रकृते - रामोऽधुनैवेत्यादि वितर्कयुक्तं वाक्यं निःसापत्न्यवनगमनोपक्षेपकं प्राग्वत्प्राप्त्याशाप्रदर्शकं रूपम्।

**अथोदाहरणम्।**[९१]

सोत्कर्षं स्यादुदाहृतिः।

यथा प्रकृते - सखे परं पुत्रवतामित्यादिपद्येन रामस्योत्कर्षाभिधानं भार्गवनिग्रहोपक्षेपेण प्राग्वत्प्राप्तिप्रदर्शकमुदाहरणम्।

---

[८७] DR I.37-38.

[८८] DR I.38.

[८९] DR I.38.

[९०] DR I.39.

[९१] DR I.39.

**अथ क्रमः**

क्रमः सन्चिन्त्यमानाप्तिः।

[६२]यथा प्रकृते - समं प्रजानामवनं वनं वेत्यादि पद्येनाभिलषितवनगमनस्य पूर्वप्रतिश्रुतवरद्वयेत्यादिना प्राप्तिः। प्राग्वत्प्राप्त्याशाप्रदर्शिका क्रमः।

अथ मतभेदेन क्रमान्तरम्। भावज्ञानमथापरे। यथा- रामः - वत्स लक्ष्मण वैदेहीमानयेत्यनेन रामोऽधुनैवेत्यादिपद्योपक्षिप्तदशरथभावस्य ज्ञानं क्रमः।

**अथ सङ्ग्रहः**[६३]

सङ्ग्रहः सामदानोक्तिः।

यथा प्रकृते - बिना भवन्तं भवने महौजसमित्यादिना सामदानकथनं भरतजनितवनगमनविघ्नापोहद्वारा प्राग्वत् प्राप्त्याशाप्रदर्शकं सङ्ग्रहः।

**अथानुमानम्।**[६४]

अभ्यूहो लिङ्गतोऽनुमा।

यथा प्रकृते - स्मारं स्मारं स्वसारं तामित्यादिना नासिकास्पर्शहेतुना रावण-क्रोधस्यानुमानं सीताहरणप्रदर्शकमनुमानम्।

**अथाधिबलम्।**[६५]

अधिबलमभिसन्धिः।

अभिसन्धिर्वञ्चनम्। रामः सुवर्णस्य मृगस्येत्यादिपद्येन स्वर्णमृगवेषेण मारीचेन रामस्याभिसन्धानं भिक्षुवेषेण रावणेन च सीतायाश्चाभिसन्धानं प्राप्त्याशाप्रदर्शनमधिबलम्।

ग्रन्थान्तरे तु तोटस्यान्यथाभावं ब्रुवतेऽधिबलं बुधाः।[६६] यथा प्रकृते तेन सोपानेनेत्यादिविनयवचनमधिबलम्।

**अथ तोटकम्**

संरम्भवचनं यत्तु तत्तोटकमुदाहृतम् यथा प्रकृते - उग्राग्रैः करपत्रवक्त्रकरजैरित्यादि संरम्भवचनं प्राप्त्याशाप्रदर्शकं तोटकम्।

**अथोद्वेगः**

उद्वेगोऽरिकृता भीतिः।

---

[६२] DR I.39.
[६३] DR I.40.
[६४] DR I.40.
[६५] DR I.40.
[६६] DR I.41.

यथा प्रकृते – जेतारं जामदग्न्यस्येत्यादिनारिकृतं भयं प्राप्त्याशाप्रदर्शकमुद्वेगः।

**अथ सम्भ्रमः।**

शङ्कात्रासौ च सम्भ्रमः।[९७]

यथा प्रकृते – हा हतौ स्वः किमेतदिति शङ्कात्रासौ वनगमनोपक्षेपकत्वेन प्राग्वत् प्राप्त्याशाप्रदर्शकौ सम्भ्रमः।

**अथाक्षेपः**

गर्भबीजसमुद्भेदाक्षेपः परिकीर्तितः।[९८]

यथा प्रकृते – निस्सन्देहमनेन रघूद्वहेनेत्यादिना जेतारं जामदग्न्यस्येत्यादिना कण्ठीरवेण रिपुकुम्भिकदम्बकानीत्यादिना च गर्भबीजस्य सीतासमागमप्रतिबन्धकबालिरावण-जगद्विजयसमर्थपराक्रमातिशयगर्भबीजस्यापायरूपापायनिवारणोपायस्य प्रकाशनात् कार्यसिद्धैराक्षेप आक्षेपः।

गर्भसन्धावभूताहरणमार्गतोटकाधिबलाक्षेपाणां प्राधान्यमितरेतरेषां यथासम्भवं प्रयोग इति।

**अथावमर्शसन्धिः।**

क्रोधेनावमृशेद्यत्र व्यसनाद्वा विलोभात्।
गर्भनिर्भिन्नबीजार्थः (बीजोऽर्थः)[९९] सोऽवमर्श इति स्मृतः।।[१००]

व्यसनं दुःखं विलोभनमनुकूलत्वं यत्र सर्वसाधारणोपायक्रोधव्यसन-विलोभनान्यतमेन भवितव्यमनेनार्थेनेति कार्यप्राप्तिर्निर्धारणम्। यथा वेण्यां क्रोधेन मुद्राराक्षसे मित्रचन्दनदासदुःखेन, शकुन्तलायां कार्यप्रतिकूल-शापमोक्षजनितदुष्यन्तानुकूल्येन कार्यप्राप्तिनिश्चयः सोऽवमर्शसन्धिः। अपायनिवारणोपायरूपगर्भसन्ध्युद्भिन्नबीजेनार्थादपायाभावाद्वारार्थः कार्यसिद्धिर्यत्र सः। अत्र क्रोधादीनामर्थाक्षिप्तत्वेनपायाभावतः प्राप्तिनिश्चयोऽवमर्शसन्धिः। अपायनिवारणोपायरूपगर्भसन्ध्युद्भिन्नबीजेनार्थादपायाभावद्वारार्थः कार्य-सिद्धिर्यत्र सः। अत्र क्रोधादीनामर्थानामाक्षिप्तत्वेनापायाभावतः प्राप्ति-निश्चयोऽवमर्शसन्धिरिति फलितोऽर्थः। यथा प्रकृते छद्मनाऽपि मृगे हेतुरित्यात्याद्या षष्ठाङ्कान्तमवमर्शसन्धिः। तत्र क्रोधकोपकरुणेत्यादौ स्फुटेन क्रोधव्यसनविलोभनेन प्रागुदाहृतपराक्रमातिशयरूपगर्भसन्ध्युगद्भिन्न-

---

[९७] DR I.42.

[९८] DR I.43.

[९९] बीजोऽर्थः in Ms.

[१००] DR I.43-44.

बीजजनितदनुकबन्धबाल्याद्यपायाभावतः सीतासमागमनिश्चयः। मालत्यां नवमाङ्कमारभ्यमहाभागे पुनराश्वस्य नः किमर्थमन्तर्हितासीत्यन्तमवमर्शसन्धिः। तत्र कामन्दकीशिष्यसौदामन्या[१०१] नुकूल्येन मालतीप्राप्तिनिश्चयः।[१०२] मालविकाग्निमित्रे पञ्चमाङ्कादारभ्य तस्स इअं कणीअसी बहिणिआ मालविआ णामेत्यन्तमवमर्शसन्धिः। तत्र दोहदपूरणजनितधारिण्यानुकूल्येन मालविकालाभनिश्चयः।

**अथास्याङ्गानि।**

तत्रापवादसम्फेटौ विद्रवद्रवशक्तयः।
द्युतिः प्रसङ्गश्छलनं व्यवसायो विरोधनम्।
प्ररोचना विचलनमादानं च त्रयोदश।[१०३]

तत्र – दोषप्रख्याऽपवादः स्यात्।[१०४] यथा प्रकृते – क्वचित् कौणपे शापवादप्रवादमिति रावणदोषप्रकटनं तदभावोपक्षेपकत्वेन सीतासमागमनिश्चयप्रदर्शकमपवादः। एवमग्रेऽपि सम्फेटादीनामङ्गानामभावोपक्षेपणं कार्यनिश्चयात्मनियताप्तिप्रदर्शकत्वं बोध्यम्।

**अथ सम्फेटः।**[१०५]

सम्फेटो रोषभाषणम्। यथा प्रकृते – कोपकरुणेत्यादिशेषभाषणं सम्फेटः।

**अथ विद्रवः।**

विद्रवो वधबन्धादिः।

यथा प्रकृते – कमठकठिनगात्रैरित्यादिना प्रचलित एवेत्यन्तेन मेधनादादिवधो विद्रवः।

**अथ द्रवः।**[१०६]

द्रवो गुरुतिरस्कृतिः।

यथा प्रकृते – तेन तेन च तप्तानामित्यादिना निजज्येष्ठरावण- वालितिरस्कारः

---

१०१ Ms. A reads सौदामिन्या।

१०२ Instead of these two sentences starting from मालत्यां and ending with मालतीप्राप्तिनिश्चयः, Ms. B gives only one sentence – "मालत्यां न मालतीप्राप्तिनिश्चयः"। It must be the copyist's error.

१०३ DR I.44-45 tally.

१०४ DR I.45.

१०५ DR I.45.

१०६ DR I.45.

सुग्रीवविभीषणकृतो द्रवः।

**अथ शक्तिः।**[१०७]

विरोधशमनं शक्तिः।

यथा प्रकृते गीयन्ते प्रगुणगुण इत्यादिपद्येन विरोधशान्तिः शक्तिः।

अथ द्युतिः। तर्जनोद्वेजने द्युतिः।

यथा प्रकृते दिक्पालद्विरदेन्द्रेत्यादिना तर्जनोद्वेजने रामस्याक्रोधोपक्षेपकत्वेन रावण-भावप्रदर्शके द्युतिः।

**अथ प्रसङ्गः।**[१०८]

गुरुकीर्तनं प्रसङ्गः।

यथा प्रकृते – ताते नयः तेनेत्यादिना गुरुजनकीर्तनं प्रसङ्गः।

**अथ छलनम्।**[१०९]

छलनं चावमाननम्।

यथा – प्रकृते सुरंगीनिर्गतस्य पाटच्चरस्यापलाप एव शरण- मित्यन्तेन रावणस्यावमाननं छलनम्।

**अथ व्यवसायः।**[११०]

व्यवसायः स्वस्वशक्त्युक्तिः।

यथा प्रकृते – सार्धं कूर्मवरेणेत्यादिपद्येन रास्य स्वशक्तिकथनं व्यवसायः।

**अथ विरोधनम्।**[१११]

संरब्धानां विरोधनम्।

यथा प्रकृते – कामं काममवत इत्यादिना। किं भवेन्न भवतोऽतिभाग्यत इत्यन्तेन संरब्धयोर् रामरावणयोः स्वशक्त्युक्तिर्विरोधनम्।

**अथ प्ररोचना।**[११२]

सिद्धामन्त्रणतो भाविकार्यदर्शिका स्यात् प्ररोचना।

---

[१०७] DR I.46.

[१०८] DR I.46.

[१०९] DR I.46.

[११०] DR I.47.

[१११] DR I.47.

[११२] DR I.47.

यथा प्रकृते – योगिन्यो भाविविज्ञा इत्यादिपद्येन भाविनो[११३] रावणनाशस्य सिद्ध त्वेनानिष्पन्नत्वेनामन्त्रणतो निर्दशात् भाविदर्शिका प्ररोचना।

**अथ विचलनम्।[११४]**

आत्मश्लाघा विचलनम्।

यथा प्रकृते स्रग्गन्धताम्बूलेत्यादिना न जामिकौ पुनर्बालिहैहेयावित्यन्तेन रावणस्यात्मश्लाघा स्वनाशोपक्षेपणी विचलनम्।

**अथादानम्।[११५]**

आदानं कार्यसङ्ग्रहः।

यथा प्रकृते भद्रासने भूषणभासीदित्यादिपद्येन विभीषणराज्यप्रतिज्ञा-निर्वाहविजयजानकीलाभानां कार्याणां सङ्ग्रह आदानम्।

अवमर्शसन्धावपवादशक्तिव्यवसायप्ररोचनाद्यानि प्रधानानि। सर्वसन्ध्यङ्गानि सर्वाणि यथासम्भवं द्वित्रादि हीनानि वा प्रयोज्यानीत्यपि केचित्।

**अथ निर्वहणसन्धिः।**

बीजवन्तो मुखाद्यार्था विप्रकीर्णा यथा (यथम्)।
एकार्थमुपनीयन्ते यत्र निर्वहणं हि तत्।[११६]

मुखसन्धौ[११७] यथासम्भवं विप्रकीर्णैर्बीजैरर्थैश्चावान्तरकार्यादिपदार्थैर्यत्र प्रधानैकफलनिर्वाहः स निर्वहणसन्धिरिति फलितोऽर्थः।

यथा प्रकृते – सप्तमाङ्केन मुख्यकार्यबीजैरनुरागादिभिर्मुखसन्ध्याद्युप-पत्तेर्युवराजत्वचतुर्दशवर्षसमाप्तिसमयकारणकराज्यलाभरावणनिग्रहकारणक-विजयाद्यर्थैः सामस्त्येन मुख्यसीतासमागमरूपैकफलनिर्वाहो निर्वहणसन्धिः।

**अस्याङ्गानि।**

सन्धिर्विबोधो ग्रथनं निर्णयः परिभाषणम्।
प्रसादानन्दसमया कृतिर्भाषोपगूहनाः।
पूर्वभावोपसंहारौ प्रशस्तिश्च चतुर्दश।।[११८]

---

११३ Ms. A reads – भावितो।

११४ DR I.48.

११५ DR I.48.

११६ DR I.48-49.

११७ Ms. A reads मुखसन्धिषु।

११८ DR I.49-50.

तत्र सन्धिर्बीजोपगमनम् ।[११९]

यथा प्रकृते – व्यक्तस्नेहा प्रियतमपदे इत्यादिना अनुरागदहनं दिव्यशुद्धिरूपबीजोपादानं सन्धिः। अत्र रावणनिग्रहजन्यानां विजयराज्यलाभसीतासमागमानां त्रयाणां कार्याणामेकान्वयित्वेऽङ्गानामपरान्वयित्वमेककारणत्वसम्बन्धेन विशेषणविशेष्य-भावसम्बन्धेन वा। किं च राज्यलाभस्य भोगसामग्रीसम्पादनद्वारा विजयस्य च निरोधित्वरूपापादनद्वारा सीतासमागमानुगुण्यमिति बोध्यम्।

अथ वियोगोपशमायेत्यन्तेन राज्यलाभविजयसीतालाभकार्याणामन्वेषणं विबोधः।[१२०]

**अथ ग्रथनम्।**

ग्रथनं तदुपक्षेपः।

यथा प्रकृते स एवायं भगवानित्यादिना राज्यलाभरूपकार्योपक्षेपो ग्रथनम्।

**अथ निर्णयः।**

अनुभूताख्या तु निर्णयः।[१२१]

यथा प्रकृते – रावणस्य रणनिःस्वनैस्तदेत्यादिना अनुभूताख्यानं निर्णयः।

**अथ परिभाषणम्।**

परिभाषा मिथो जल्पः।[१२२]

यथा प्रकृते देवि वैदेहि, त्वमेव ममैवंविधाऽऽयासकारिणीत्यादिना कव्वं कलणे विचालिअं जंपिदुं जाणिदं अज्जउत्तेणात्यंतेनान्योन्यपरिवादपरिभाषणम्।

**अथ प्रसादः।**

प्रसादः पर्युपासनम्।[१२३]

**अथानन्दः।**

आनन्दो वाञ्छितावाप्तिः।[१२४]

यथा प्रकृते सीता मुनिं प्रणमतीत्यादिना वाञ्छितप्राप्तिरानन्दः।

---

[११९] DR I.51.

[१२०] Ms. does not define विबोध. DR. 1.51 – "विबोधः कार्यमार्गणम्"

[१२१] DR I.51.

[१२२] DR I.52.

[१२३] DR I.51.

[१२४] DR I.51.

**अथ समयः।**

समयो दुःखनिर्गमः।[१२५]

यथा प्रकृते कृतार्थोऽहमिदानीमस्मीत्यनेनान्यपरिणामि सामान्यतः सर्वकार्यसिद्ध्युपक्षेपणदुःखनिर्गमः समयः। यद्वा अभिषेकमुनिः – महानयमनुग्रहो रघुकुलस्येति लब्धार्थः।

**अथ कृतिः**

औदार्यशमनं कृतिः।

**अथ भाषणम्।**[१२६]

मानाद्याप्तिश्च भाषणम्।

यथा प्रकृते राज्यं निदेशे हृदयं त्वदीयपद्येन राज्यविजयधर्मकामादिलाभो भाषणम्। अथ राज्यमितिधर्मार्थकामसाधनसम्पत्तिरुक्ता। अर्थात् स्मृतिरूपे तव निदेशे हृदयमिति निजोचितधर्मार्थकामप्रवृत्तिर्दर्शिता। तु शब्देन तादृशविजयसाधनाभ्यां सुग्रीवविभीषणाभ्यां तु मैत्रीति निजमैत्रीलाभोपक्षेप इति बोध्यम्।

**अथ पूर्वभावोपगूहने।**[१२७]

कार्यदृष्ट्यद्भुतप्राप्ती पूर्वभावोपगूहने। कार्यदर्शनं पूर्वभावः। यथा प्रकृते – सकलमनोरथसम्पादयित्रीत्यादिना प्रागनुरागस्योद्भेद इत्यन्तेनाप्रस्तुतप्रशंसया रामाभिप्रेतस्य प्रस्तुतसीतालाभकार्यस्य स्मितेन सीतया दर्शनं प्रागनुरागोद्घाटनद्वारा च समागमगर्शनं पूर्वभावः। यद्वा महाराज पूर्वमयं विमानराजो राजराजस्य तदिदानीं य आदेश इत्यादिना धनाधिनाथमित्यन्तेन महाराजेति राज्योपक्षेपेणापूर्वमयं धनदस्य ततोऽर्थाद्विजितरावणारेर्देवस्येति विजयकार्योपक्षेपेण राज्यविजयकार्यान्वयी विभीषणहृदयस्थपुष्पकविसर्जनं कार्यस्य रामेण दर्शने पूर्वभावः। केचित्तु पूर्वेतिवृत्तकथनेन कार्यदर्शनमन्वर्थः पूर्वभाव इति वदन्ति यथा प्रकृते – कस्यायं दिवसः क्वचिदित्यादिना सीतासहितविजितारिरामागमनेनाद्भुतप्राप्तिरुपगूहनम्।

**अथ काव्यसंहारः।**

वराप्तिः काव्यसंहारः।[१२८]

यथा प्रकृते – किन्ते भूयः प्रियमुपकरोमीत्यनेन समागमकार्यसिद्ध्युपक्षेपी काव्यार्थसंहरणात् काव्यसंहारः।

---

१२५ DR I.52.

१२६ मानाद्याप्तिश्च भाषणम् in DR I.53.

१२७ DR I.53.

१२८ DR I.54.

**अथ प्रशस्तिः।**[१२९]

प्रशस्तिः शुभशंसनम्।

यथा प्रकृते – जगति परगुणेषु पक्षपातीत्यादिना शुभशंसनमर्थाद्यथा मम निराधि हृदयं तथाऽन्यसहृदयस्यापि भवत्विति सर्वकार्यानुगता प्रशस्तिः।

क्वचित् सन्ध्यङ्गसम्मिश्रणेनावस्था। कार्याविरोधेन पूर्वापरसन्धिभ्यां साङ्कर्यमपि भवति। तदुक्तं भवति।

यथा सन्धि तु कर्तव्यान्येतान्यङ्गानि नाटके।
कविभिर्बन्धकुशलै रसभावमपेक्ष्य तु।
सम्मिश्राणि कदाचित्तु द्वित्रियोगेन वा पुनः।
ज्ञात्वा कार्यमवस्थां च कार्याण्याङ्गानि नाटके।।[१३०]

यथा रुमावल्यां निर्वहणाङ्गसन्धिविबोधान्तरमवमर्शाङ्गप्रसङ्गे विचलनोदाहरणम्।

उक्ताङ्गानां चतुष्षष्टिः षोढा चौषां प्रयोजनम्।
इष्टस्यार्थस्य रचना गोप्यगुप्तिः प्रकाशनम्।
रागः प्रयोगस्याश्चर्यं वृत्तान्तस्यानुपक्षयः।।[१३१]

इति। प्रकाशनमर्थात् प्रकाश्यस्यार्थस्य रागोऽभिनवरागवृद्धिः। उपक्रमोपसंहारस्वरसेन मूर्तिमानिव शृङ्गारो वीररसश्चेत्यग्रे रूपकेणास्य प्रथमोपात्तत्वात् प्रकृते शृङ्गाररसस्य प्राधान्यम्, वीररसपक्षपातिनस्तु भावकारविस्तरेणोपनिबन्धाद्वीररसस्य प्राधान्यं मन्यन्ते। तच्च ज्ञानं भ्रमः। प्रमापीत्यन्यदेव तत्। परन्तु तादृशभावकहृदयाभिसन्धिप्रकाशनाय वीररसबन्धस्य विलक्षणबीजकार्यादिव्युत्पत्तये च प्रकृते वीररसप्राधान्यम् उपेत्य बीजाङ्गादिकमुदाह्रियते। अस्मिन् पक्षे सीतालाभराज्यलाभरूपावान्तरकार्यविशिष्टो रावणप्रातियोगिको विजयः प्रधानकार्यम्। प्रस्तावनान्तरमारभ्य सीतायां परिज्ञास्यतीत्यन्तेन पराक्रमप्रतोपात्साहसीताहरणादिरूपबीजकार्यबीजसमुत्पत्तिर्मुखसन्धिः। तत्र प्रागुपदर्शितसन्देहानुत्कटकोट्याः सुलभोपायेन कन्यारत्नमपहर्तव्यमित्यादिना नृपपराक्रमसीताहरणात्मविजयं बीजोपक्षेपेणोपक्षिप्तानि शितशरसमूहेत्यादिनासकलगुणाय रामाय रामो नामेत्याद्यन्तेन पराक्रमपरतापससत्त्वोत्साहादि विजयबीजानां बहुलीकरणात् परिकरः। लङ्केश्वरमनसि समाहितेत्यादिना दर्शितविजयबीजनिष्पत्या परिन्यासः। बीजकार्यारम्भावस्थापि प्रेक्ष्यमाणप्रथितादद्भुताकृतीत्यादिना

---

[१२९] DR I.54.

[१३०] NŚ IXX.104b – variants – काव्यकुशलैः, सन्धिषु।

[१३१] DR. I.54-55.

माल्यवतो निशासु निद्राच्छेद इत्यन्तेन पराक्रमप्रतापादि विजयबीजोपादानेन समाधानम्। पराक्रमाद् गुणाख्यानेन विलोभनम्। रावणपक्षारुन्तुदविलक्षण-मनुजत्वेन माल्यवन्निद्राच्छेदेन च विजयरूपार्थावधारणा द्युतिश्च। कष्टं वैरिवंशप्रसूतेत्यादीना गूढं वैरापशकुनरूपविजयबीजस्योद्भेदनादुद्भेदः। किं वाऽस्मत्प्रभोरेव मतिविपर्यय इत्यनेनमतिविपर्ययात्मबीजान्वयेन कौशिकादीनां प्रोत्साहनादुभेदः वचनविषयातीतशक्तिरित्यादिना तदुपदर्शयेत्यादिना। रामः- सहर्षं तदिदानीमित्यादिना च पराक्रमबीजान्वयेन क्रमेण परिभावनाकरणप्राप्तस्य दशकन्धरगर्वस्येत्यादिना पराक्रमविजयस्य मुखसन्धावपि बिन्दुत्वसम्पादनमिति। शतानन्दः - रामभद्र शीघ्रं शाम्भवशरासनमारोपयेत्यादिना तृतीयाङ्कसमाप्त्यन्तेन रावणाशक्यधनुर्भेदेन पराक्रमोत्साहादि बीजानां लक्ष्यतयोद्भेदः। भार्गवमिलनेन वा लक्ष्यतयोद्भेदः प्रतिमुखसन्धिः। रामभद्र शीघ्रमित्यादिना प्रयत्नावस्थापि। धनुर्भङ्गेन दृष्टस्यान्तरा सीतालापादिना नष्टस्य कथमहो तदपि भद्र शीघ्रमित्यादिना प्रयत्नाद् भर्गस्य धनुरित्यादिना पराक्रमबीजस्य पुनरनु-सरणात् परिसर्पः। उल्लङ्घ्य मामित्यादिना भुजाभोगस्य शक्रे क्षणादित्यन्तेन रामभार्गवयोरन्योन्यवचनेनोत्तरोत्तरपराक्रमबीजोद्भेदनात् प्रगमनम्। अज्जउत्त पुणो पुणो किं भणामीत्यादिना विजयानुकूलस्य रावणजिदर्जुनजिद् भार्गवाभिगमनरूपाभीष्टस्यानिरोधनम्। विरोधित्वे वा बीजान्वितं निरोधनम्। अपि प्रिये सर्वथेत्यादिना तादृशाभिगमनाय सीतायाः प्रसादनादुपन्यासः। सकलधरणिपालेत्यादिना विरोधित्वेन विजयान्वितं वज्रम्। भो भोः सर्वे ब्राह्मणा राजानश्चेत्यादिना विरोधित्वेन विजयान्वयी वर्णसंहारः। जितेऽपि जैत्रेऽन्वयादित्यादिना सविशेषपराक्रमोद्घाटनं पुष्पम्। गर्भसन्धिः पुनरन्यस्मिन् पक्षेऽपि स एव। तत्र रावणजिदर्जुनजिद्भार्गवविजयेन पराक्रमबीजस्याप्राप्तिः। अपायोपायावप्यत्र पूर्वोक्तावेव। आगममयोगिमनसामित्यादिना मार्गः। निस्सन्देहमनेन रघूद्वहने-त्यादिनानुमानम्। वत्स रघुधुरीणेत्यादिना प्रियवचनविजयसाधारणधनुर्दानाभ्यां सङ्ग्रहः। शेषाण्यङ्गानि तान्येव। परन्तु वनगमनरावणेनप्ररूढसख्यस्येत्यादिना रावणमित्रबालिवधतर्काद् रूपम्। कण्ठीरवेण रिपुकुम्भीत्यादिना तोटकम्। शेषाण्यङ्गानि तान्येव। परन्तु वनगमनस्य निरुक्तविजयप्राप्त्याशा प्राप्त्युप-क्षेपकत्वम्। सीताहरणबीजोपक्षेपकत्वं चेति तद्बोधकताङ्गानां प्राप्त्याशा प्रदर्शकत्वम्। शेषाङ्गानां तु तादृशभार्गवजयपराक्रमबीजाद्युपक्षेपेण विजयाशानुगतत्त्वमिति बोध्यम्। अवमर्शसन्धिरपि स एव। अङ्गोदाहरणान्यपि तान्येव। परमत्रविजयप्रत्यर्थिवालिरावणादिरूपापायाभावोपक्षेपकारणमङ्गानां विजयकार्यरूपनियताप्तिप्रदर्शकत्म्। निर्वहणसन्धिरपि स एव। अङ्गोदाहरणान्यपि तान्येव। अद्भुतं अज्जउत्तमाहप्पमित्यादिना माहात्म्यसेतुबन्धरूपविजयबीजोपादानेन

वा सन्ध्याख्यमङ्गम्। अत्राङ्गानां प्राग्वदेककारणत्वसम्बन्धेन विशेषण-विशेष्यसम्बन्धेन वा मुख्यावान्तरकार्यानुविधायित्वमिति बोध्यम्। अथाधिकारिक-सन्धिसात्म्येमुख्यत्वमेवात्र स्यादिति प्रधानेतिवृत्ते यथासम्भवमेकद्वित्रिचतुर्भिः सन्धिभिरूनं पताकावृत्तं विधेयम्। सन्ध्यङ्गानां सन्ध्यङ्गान्यपि यथासम्भवं विधेयानि। प्रकरीवृत्ते त्वेकसन्धिसद्भावेऽपि पताकात्वमेव स्यादिति सर्वथा सन्धिहीना प्रकरी विधेयेति। तदुक्तं भरते –

पताकावृत्तमप्यूननेकाद्यैरनुसन्धिभिः
अङ्गान्यत्र यथालाभमसन्धि प्रकरीं न्यसेदिति।[132]
अनुसन्धिरिति पताकासन्धिनाम। तच्च भरते –
एकोऽनेकोऽपि वा सन्धिः पताकायास्तु यो भवेत्।
प्रधानार्थानुयायित्वादनुसन्धिः स कीर्त्यत इति।[133]

यथा प्रकृते पताकारूपसुग्रीवविभीषणेतिवृत्तं गर्भावमर्शसन्धिभ्यां हीनं तत्र रावणेन सीताया हरणेत्यादिना अतः परं दैवाधीनमित्यन्तेन मुखसन्धिः। रावणेनेत्यादिना उपक्षेपः। अनेन च प्रसंङ्गेनेत्यादिना परिकरयुक्ती। हा वत्सेत्यादिनापरिन्यासविलोभनोद्भेदाः। अत्र रावणजिद्बालिवधोपक्षेपेण रावण-वधोपक्षेपणम्। एवमग्रेऽपि बोध्यम्। तेन सोपानेनेत्यादिना तयोर्निवेदयामीत्यन्तेन प्रतिमुखसन्धिः। तेन सोपानेनेत्यादिना पर्युपासनोपान्यासप्रगमनानि। पक्षो भवानित्यादिना पुष्पम्। मतेन च तप्तानामित्यादिना भद्रासनेभूषण-भासीत्यन्तेन निर्वहणसन्धिः। तेन तेनेत्यादिना सन्ध्याख्यमङ्गम्। देव प्रतिसन्देशोऽप्येष एवेत्यादिना पूर्वभावकृतान्वयस्य कुतः कावेतावित्यादिना विरोधः। प्रत्यासन्नं राज्यं प्रथयतीत्यादिना ग्रथनम्। प्राज्यं राज्यमित्यादि पद्येन च भाषणानन्दौ। अथाप्रस्तुतार्थकथनेनाप्रस्तुतप्रशंसारूपकोपमाति-शयोक्त्यादिभिरागामिप्रस्तुतार्थव्यञ्जकं पताकास्थानकम्। भरते सन्धिनियम-स्यानुक्तत्वात् तच्च सर्वसन्धिषु यथासम्भवं विधेयम्। किञ्च पताकास्थानकान्यत्रेति वाक्येऽत्राङ्के पताकास्थानकानीत्येकबहुवचनयोर्निर्देशादनियम एवोक्तः। लक्षणं त्वस्य

प्रस्तुतागन्तुभावस्य वस्तुनोऽन्योक्तिसूचकं पताकास्थानकम्।[134]

अन्यस्याप्रस्तुतार्थस्य उक्त्या कथनेन सूचकं व्यञ्जकम्। अत्रान्योक्त्या समासोक्त्या वा प्रस्तुतसूचने चमत्कारस्याधिक्यमिति धनिकस्य कपोलकल्पितमसदेव

[132] This verse does not occur in NŚ. It occurs in DR III.27.
[133] NŚ XIX.28.
[134] Comp. NŚ XIX.30.

भरतेनानुक्तत्वात्। रूपकोपमाश्लेषादिभिरपि सूचने चमत्कारस्याविशेषाच्च। तथा च भरतः यत्रार्थे प्रस्तुतेऽन्यस्मिंस्तल्लिङ्गोऽन्यः प्रयुज्यते। आगन्तुकेन भावेन पताकास्थानकं तु तदिति।[१३५]

तल्लिङ्गः प्रस्तुतार्थव्यञ्जकः। किञ्च –

उद्दामोत्कलिकां विपाण्डुररुचं प्रारब्धजृम्भां क्षणा-
दायासं श्वसनोद्गमैरविरतैरातन्वतीमात्मनः।
अद्योद्यानलतामिमां समदतां नारीमिवान्यां ध्रुवं
पश्यन् कोपविपाटलद्युति मुखं देव्याः करिष्याम्यहम्।[१३६]

इति पताकास्थानकोदाहरणे रत्नावलीपद्ये सकलकलं पुरमेतज्जातं सम्प्रति-सुधांशुबिम्बमिवेति चात्रोपमानस्योपादानं बिना न विवक्षितरत्नावलीप्रतीतिर्भवति श्लेषप्रतिभोत्पत्तिहेतुरुपमालङ्कार इति समासोक्तिकथनमपि धनिकस्यासदेव।[१३७] यथा प्रकृते आयान्तीं वनदेवतामित्यात्यादिपद्यद्वयेन सङ्घट्टनसूचनकरं उद्भिणुमाइ इत्यादिना प्रकृतनायकनायिकाव्यवहारसूचकं वअस्स तुमं खु जुवराओ इत्यादिना सीताकपोलपाण्डुनादीनां गमननिबन्धनत्वसूचकम्। आर्य[१३८] गृह्यतामियमित्यादिना सीतालाभसूचकं प्रथमेऽङ्के पताकास्थानकचतुष्टयम्। क्रोधारुणवार्यमाणेत्यादिना जनकनृपप्रवेशसूचकम्। तदपि राज्यारीभूतेत्यादिना रामकर्तृकसुग्रीवविभीषण-राज्यलाभसूचकं पञ्चमेऽङ्के पताकास्थानकद्वयम्। एवमन्यदपि बोध्यम्। अथ

द्वेधा विभागः कर्तव्यः सर्वस्यापीह वस्तुनः।
सूच्यमेव भवेत् किञ्चित् दृश्यं श्रव्यमथापरम्।।

नीरसोऽनुचितस्तत्र संसूच्यो वस्तुविस्तरः।
दृश्यस्तु मधुरोदात्तरसभावनिरन्तरः।।[१३९]

तत्र अर्थोपक्षेपकैः सूच्यं पञ्चभिः प्रतिपादयेत्।
विष्कम्भचूलिकांकास्याङ्कावतारप्रवेशकैः।[१४०]

विष्कम्भकस्तु –

---

[१३५] NŚ IXX.30.

[१३६] *Ratnāvalī* II.4.

[१३७] Dhanika's remarks on *Ratnāvalī* III.6 or II.4 are missing in printed editions of *Avaloka*.

[१३८] अयि ळ.

[१३९] DR I.56-57.

[१४०] DR I.58.

वृत्ते[141] वर्तिष्यमाणानां कथांशानां निदर्शकः।
सङ्क्षेपार्थस्तु विष्कम्भो मध्यपात्र प्रयोजितः।[142]

स च द्विविधः।

एकानेककृतः शुद्धः सङ्कीर्णो नीचमध्यमैः।[143]

एकानेकमध्यपात्रकृतः शुद्धः युगपन्नीचमध्यमकृतः सङ्कीर्णः। यथा प्रकृते - वृत्तबाणरावणादिवृत्तान्तनिदर्शको भाविजनककौशिकमिलनादिवृत्तान्त-निदर्शितश्शतानन्दकुशाग्रबुद्धिकृतः शुद्धविष्कम्भकः। सङ्कीर्णो यथा मालविकाग्निमित्रे प्रथमाङ्के चेटीगणदासकृतः। अथ प्रवेशकः।

तद्वदेवानुदात्तोक्त्या नीचपात्रप्रयोजितः।
प्रवेशोऽङ्कद्वयस्यान्तः शेषार्थस्योपसूचकः[144]

तद्वदेव विष्कम्भवदेव। भूतभविष्यदर्थस्य सूचकः। अनुदात्तोक्त्या नीचपात्रप्रयोजित इति विष्कम्भकाद् भेदः। अङ्कद्वयस्यान्तरिति प्रथमाङ्के प्रवेशकस्य प्रतिषेधः। एतस्याङ्कवद्धि द्वितीयाङ्कादिमुखेषुमध्यमवर्तित्वसम्भवाद् विधानम्। यथा मालत्यां द्वितीयेऽङ्के चेटीभ्यां कृतः प्रवेशकः। व्यक्तस्नेहेत्यादिना नेपथ्यपात्रेणा वह्निदिव्यशुद्ध्यादिसूचना चूलिका।

**अथाङ्कास्यम्।**

अङ्कान्तपात्रैरङ्कास्यं छिन्नाङ्कस्यार्थसूचना।[145]

अङ्कान्तपात्रे अङ्कान्तपात्रान्तरेण पूर्वकथार्थविच्छेदात् छिन्नस्य विश्लेषस्य उत्तराङ्कमुखस्य सूचनम्, तद्वशेनोत्तराङ्कावतारोऽङ्कास्यमिति। यथा मालत्यां तृतीयेऽङ्के नेपथ्ये कलकल इत्यादिना शार्दूलप्रसङ्गेन पूर्व-कथाविच्छेदे बुद्धरक्षितामाधवकामन्दक्यादिभिरङ्कान्तपात्रैश्चतुर्थाङ्कमुखस्य सूचनादङ्कास्यम्। वीरचरिते द्वितीयाङ्कान्ते प्रविश्य सुमन्त्र इत्यादिना शतानन्दजनकसम्बन्धीपूर्वकथाविच्छेदे सुमन्त्रपात्रेणोत्तराङ्कमुखसूचनादङ्कास्यम्। यथा प्रकृते द्वितीयाङ्कान्ते प्रौढौक्तिप्रगल्भः सवैलक्ष्यरोषं पार्वतीपतेः प्रधानान्तेवासी परशुरामो न जीवति ज्ञायत इत्यादिना जनककौशिकशतानन्दसम्बन्धिपूर्वकथाविच्छेदे उत्तराङ्कमुखरूपपरशुरामागमनसूचनादङ्कास्यम्। परन्तु तृतीयाङ्कादि चूलिका-

---

[141] Ms. A reads वृत्त.

[142] DR I.59.

[143] DR I.60.

[144] DR I.60-61.

[145] DR I.62.

सङ्कीर्णम्। तत्र तृतीयाङ्कादौ ततः प्रविशति परशुराम इत्याद्युचितं निवद्ध्या-सङ्कीर्णमपि बोध्यम्।

अथाङ्कावतारः।

अङ्कावतारस्त्वङ्कान्ते पातोऽङ्कस्याविभागतः।
एभिः संसूचयेत् सूच्यं दृश्यमङ्कैः प्रदर्शयेत्।[१४६]

यत्राङ्कान्तेऽसूचित एव पूर्वाङ्कपात्राविभागेन पूर्वाङ्काविच्छिन्नार्थ-तयैवाग्रिमाङ्कोऽवतरति अर्थात् प्रवेशकविष्कम्भकादिशून्यः सोऽङ्कातारः। यथा मालविकाग्निमित्रे प्रथमाङ्कान्ते विदूषकः - तेण हि दुवं वि पेक्खाघरे संगीतोवअरणं करिअ तत्त भवदो दूदं विसज्जिह अहवा मुदंगसद्दो ज्ज एणं उत्थावउस्सदीत्याद्युपक्रमबलेन[१४७] नेपथ्ये मृदङ्गध्वनिरित्यादिना सूचितस्य पात्रसङ्क्रान्तिदर्शनरूपपूर्वकथार्थाविच्छेदात् प्रथमाङ्कार्थाविच्छेदेनैव पूर्वाङ्कपात्राविभागेन च पात्रसङ्क्रान्तिदर्शनारम्भरूपद्वितीयाङ्कस्या-वतरणादङ्कावतारः। मालत्यां नवमाङ्कान्ते मकरन्दः। तदत्र कान्तार-गहने सहास्मद्वर्गेण प्रतिष्ठा भगवतीमन्विष्य तस्या वृत्तान्तमेनं कथयामीत्यनेन पूर्वकथार्थाविच्छेदेनैवोत्तराङ्कावतारस्य सूचनादङ्कावतारः। पूर्वकथार्थाविच्छेदे सत्यङ्कान्तेऽग्रिमाङ्कार्थसूचनेऽङ्कास्यं पूर्वकथार्थाविच्छेदे सत्यङ्कान्तेऽग्रिमाङ्कार्थासूचनेऽङ्कावतार इत्यनयोर्भेदनिष्कर्षः। अत्र केचिद् ग्रन्थाभिसन्धिविज्ञाः विष्कम्भकादिशून्येऽग्रिमाङ्कमुखे पूर्वाङ्कप्रविष्ट-पात्रान्यतमप्रवेशस्याधिकरणे तदनधिकरणे वा सत्यङ्कान्तेऽग्रिमार्थसूचने क्रमादङ्कावताराङ्कास्ये इत्याहुः। तत्र *तोऽङ्कस्याविभागत* इत्युक्तः पूर्वाङ्कपात्राविभागोऽनन्तरोक्ते मूलम्। पूर्वाङ्ककथार्थाविभागश्च प्रोक्ते मूलम्। अस्मिन् पक्षे मालत्यां दर्शितनवमाङ्कान्तेऽङ्कास्ये तृतीयाङ्कान्ते वाऽङ्कावतार इत्यत्र यथोदाहृतमेवेति दिक्। विष्कम्भादिषु पञ्चसु न। किन्तु तेन सूच्यमर्थमेभिः सूचयेत्। दृश्यमर्थं चाङ्कैः प्रदर्शयेदिति भेदेन कथनमुचितम्।

अथ पुनर्वस्तुनस्त्रिधा विभागः।
नाट्यधर्ममपेक्ष्यैतत् पुनर्वस्तु त्रिधेष्यते।
सर्वेषां नियतस्यैव श्राव्यमश्राव्यमेव च।

---

१४६ DR I.62-63.

१४७ तेन हि द्वावपि वर्गौ प्रेक्षागृहे संगीतोपकरणं कृत्वा तत्रभवते दूतं प्रेषयत। अथवा मृदङ्गशब्द एव न उत्थापयिष्यति। *Vidūṣaka*'s dialogue at the end of the first act of *Mālavikāgnimitram*. In place of संगीतोवअरणं (सङ्गीतोपकरणं) the variant reading in the printed editions of the play is संगीदरअणं (सङ्गीतरचनाम्)।

सर्वश्राव्यं प्रकाशं स्यादश्राव्यं स्वगतं मतम्।[१४८]

सर्वश्राव्यं सर्वाश्राव्यं नियतश्राव्यं वेति त्रिविधं वस्तु। तत्रान्यन्नियतश्राव्यम् द्विधा।

द्विधान्यत्राद्य धर्माख्यजनान्तमपवारितम्।

तत्र जनान्तिकम्

त्रिपताकाकरेणान्यानपवार्यान्तरा कथाम्।

अन्योन्यामन्त्रणं यत् स्याज्जनान्ते तज्जनान्तिकम्।।[१४९]

ऊर्ध्वसर्वाङ्गुलिवक्रानामिकाङ्गुष्ठः करः त्रिपताकलक्षणः।[१५०]

**अथापवारितम्।**

रहस्यं कथ्यतेऽन्यस्य परावृत्त्यापवारितम्।[१५१]

अथाकाशभाषिताख्यो नाट्यधर्मः।

किं ब्रवीष्येवमित्यादि बिना पात्रं ब्रवीति यत्।

श्रुत्वेवानुक्तमप्येवं तत् स्यादाकाशभाषितम्।[१५२]

तेषामुदाहरणानि प्रकृतेस्यन्येषाम्।

**अथ वाच्य[१५३]प्रपञ्चः।**

पाठ्यं[१५४] तु संस्कृतं नृणामनीचानां कृतात्मनाम्।

लिङ्गिनीनां महादेव्या मन्त्रिजावेश्ययोः क्वचित्।[१५५]

क्वचित् लिङ्गिनीनां ज्ञातशास्त्राणामुपलक्षणमेतासां सदा संस्कृतपाठः। देवीमन्त्रिजादीनां तु क्वचित्। ग्रन्थान्तरे तु विशेषः।

योषित् सखीबालवेश्याकिरातास्परसां तथा।

वेदाध्यार्थं प्रदातव्यं संस्कृतं चान्तरान्तरा।।[१५६]

---

[१४८] DR I.60-64.

[१४९] DR I.65b-66a.

[१५०] यस्य न श्रव्यं तस्यान्तरं ऊर्ध्वाङ्गुलं वक्रनामिकात्रिपताकालक्षणं करं कृत्वाऽन्येन सह यन्मन्त्र्यते तज्जनान्तिकम् । Dhanika on DR I.65b-66a.

[१५१] DR I.66.

[१५२] DR I.67.

[१५३] Ms. A reads वाद्य।

[१५४] वाद्य इति तत्रैव।

[१५५] DR II.64.

[१५६] Com. NŚ XVII.34-42 कारणव्यपदेशेन प्राकृतं सम्प्रयोजयेत्। दारिद्र्याध्ययनाभाव-यदृच्छादिभिरेव च। ऐश्वर्येण प्रमत्तानां दारिद्रेण प्लुतात्मनाम्। अनधीतोत्तमानां च →

योषिद्राजकुमार्यादेः यथा प्रकृते सीतासूनृतयोः संस्कृतपाठः। स्त्रीणां तु प्राकृतप्रायः। शौरसेन्यधमेषु च।

शौरसेनी मागधी च स्वशास्त्रनियन्त्रिते।
पिशाचात्यन्तनीचादौ पैशाचं मागधं तथा।

यद्देशं नीचपात्रं तद्देशं तस्य भाषितम्।
कार्यतश्चोत्तमादीनां कार्यो भाषाव्यतिक्रमः।[१५७]

कार्यमनुवाचनादि। यथा प्रकृते वाचनावशेन स्वप्नेऽपि रमते यत्रेत्यादि श्लोकपाठः सीतायाम्।

**अथामन्त्रणप्रकारः।**

भगवन्तोऽवरैर्वाच्या विद्वद्देवर्षिलिङ्गिनः।
विप्रामात्याग्रजश्चार्या नटीसूत्रभृतौ मिथः।[१५८]

अर्थादार्याविति वाच्यौ।

रथी सूतेन चायुष्मत् पूज्यैः शिष्यात्मजानुजाः।।
वत्सेति तात पूज्योऽपि सुगृहीताभिधस्तु तैः।[१५९]

पूज्येन शिष्यात्मजानुजाः वत्सेति तातेति च। तैः पूज्योऽपि तातेति सुगृहीतनामन्निति च वाच्यः।

भावोऽनुगेन सूत्री च मार्षेत्येतेन सोऽपि च।[१६०]

अनुगेन पारिपार्श्विकेन।

देवस्वामीति नृपतिर्भृत्यैर्भट्टेति चाधमैः।
आमन्त्रणीयाः पतिवज्ज्येष्ठमध्याधमैः स्त्रियः।

---

← संस्कृतं न प्रयोजयेत्।। व्याजलिङ्गप्रविष्टानां श्रमणानां तपस्विनाम्। भिक्षुचक्रराणां च प्राकृतं सम्प्रयोजयेम्।। भागवततापसोन्मत्तबालनीचगृहोपसृष्टेषु। स्त्रीनीचजातिषु तथा नपुंसके प्राकृतं योज्यम्।। परिव्राण्मुनिशाक्येषु चोक्षेषु श्रोत्रियेषु च। शिष्टा ये चैव लिङ्गस्थाः संस्कृतं तेषु योजयेम्।। राज्ञ्याश्च गणिकायाश्च शिल्पकर्यास्तथैव च। कलावस्थान्तरकृतं योज्यं पाठ्यं तु संस्कृतम्।।... क्रीडार्थं सर्वलोकस्य प्रयोगे च सुखाश्रयम्। कलाभ्यासाश्रयं चौव पाठ्यं वेश्यासु संस्कृतम्।।

१५७ Com. NŚ XVII.26-63.

१५८ DR II.67, comp. NŚ XVII.67-95.

१५९ DR II.68.

१६० DR II.69.

विद्वद्देवादिस्त्रियो भर्तृवद्देवाधरादिभिर्वाच्याः ।
समा हलेति प्रेष्या च हञ्जे वेश्याज्जुका तथा ।

कुट्टिण्यम्बेत्यनुगतैः पूज्या वा जननी जनैः ।[१६१]
विदूषकेणात्रभवती राज्ञी चेटी च शब्द्यते ।

पूज्या जरती अम्बेति औचित्यवशेन लक्ष्येष्वनेकप्रकारेणापि दर्शनात् प्रायिकोऽयं सम्बोधनप्रकारः ।

**अथ वृत्तयः।**

शृङ्गारे कैशिकी हास्ये सात्त्वत्यद्भुतवीरयोः ।
शेषेष्वारभटी वृत्ती रसे सर्वत्र भारती ।।[१६२]

स्यान्नायकादि व्यापारविशेषो नाटकादिषु । व्यापारश्चेष्टा ।

तत्र भारतीशब्दवृत्तिरन्यास्तिस्रोऽर्थवृत्तयः ।

तत्र कैशिकी[१६३]

या श्लक्ष्णनेपथ्यविशेषचित्रा स्त्रीसङ्कुला प्रोज्ज्वलनृत्तगीता ।
कामोपभोगप्रचुरोपचारा सा कैशिकी चारुविलासयुक्ता ।[१६४]

चत्वार्यङ्गान्स्याः नर्म च नर्मस्फञ्जो नर्मस्फोटो थ नर्मगर्भश्च । तत्र -

वैदग्ध्यक्रीडितं नर्म प्रियोपच्छन्दनात्मकम् ।
हास्येनैव सशृङ्गारभयेन विहितं त्रिधा ।।[१६५]

तत्र केवलहास्येन यथा प्रकृते एषा सारिआ सीहंसो इत्यादिना । भयहास्येन विहितं त्रिविधम् तत्र केवलहास्येन यथा प्रकृते एसा सारिआ एसो हंसो इत्यादिना । शृङ्गारहास्येन यथा सूनृता सस्मितम् - तदो पहुदि ईरिसी भट्टिरिआ इति । भयहास्येन यथा वअस्स इमं वुत्तांतमित्यादिना एतद्वाक्यसम्बन्धि नर्मोदाहृतम् । एवं वेषचेष्टासम्बन्ध्यपि ।

---

१६१ DR II.69-71.

१६२ DR II.62.

१६३ Ms. A reads कौशिकी ।

१६४ Sundaramiśra has borrowed this stanza from the *Nāṭyaśāstra*. The reading in the Vadodara editions however differs considerably, viz:

या श्लक्ष्णनेपथ्यविशेषचित्रा स्त्रीसंयुता या बहुनृत्तगीता ।
कामोपभोगप्रभवोपचारा तां कैशिकीं वृत्तिमुदाहरन्ति ।। XX.53

१६५ DR II.48-49.

**अथ नर्मस्फञ्जः।**

नर्मस्फञ्जः सुखारम्भो भयान्तो नवसङ्गमे ।[१६६]

यथा प्रकृते प्रिये भवत्या गाढोत्कण्ठेत्यादिना लज्जावैलक्षण्यभयानि नाटयतीत्यन्तेन मालविकाग्निमित्रे मालविका भट्टा देवीए भएण अत्तणो वि पिअं काहुं ण पारेमीत्येतेन।

**अथ नर्मस्फोटः।**

नर्मस्फोटो भावलेशैः सूचिताल्परसोद्भवः।।[१६७]

यथा प्रकृते कुतोऽनुभूतमुक्तामालेव म्लायसीत्यादिना म्लानतादिभिर्भावलेशैः सीताया रामे स्तोकानुरागः प्रकाश्यते। मालत्यां गमनमलसं शून्या दृष्टिः शरीरमसौष्ठव [१६८]मित्यादिना।

**अथ नर्मगर्भः।**

नर्मगर्भो व्यवहृतिर्नेतुः प्रच्छन्नवर्तिनः। यथा प्रकृते।

ग्रन्थान्तरे –

नेतुर्वा नायिकाया वा व्यापारः स्वार्थसिद्धये।
प्रच्छादनपरो यस्तु नर्मगर्भः स कीर्तितः।[१६९]

यथा प्रकृते लताविटपान्तरितस्य रामस्य व्यवहारः सप्रयोजनः।

**अथ सात्त्वती।**

विशोका सात्त्वती सत्त्वशौर्यत्यागार्जवैः।[१७०]

उपलक्षणे चेयं तृतीया।

संलापोत्थापकावस्यां सङ्घात्यः परिवर्तकः।[१७१]
अस्याश्च संलापादीनि चत्वार्यङ्गानि।
तत्र संलापः स्याद् गभीरोक्तिर्नानाभावरसाश्रयः।[१७२]

---

१६६ DR II.50.

१६७ नर्मस्फोटस्तु भावानां सूचितोऽल्परसो लवैः।। DR II.51

१६८ *Mālatīmādhavam* I.17.

१६९ Comp. छन्न नेतृप्रतिचारोनर्मगर्भोऽर्थहेतवे । DR II.54

१७० DR II.53a.

१७१ DR II.53b.

१७२ संलापको गभीरोक्तिर्नानाभावरसा मिथः । DR II.54.

यथा प्रकृते उल्लङ्घ्यमावृतवतीत्यादिना रामभार्गवयोरन्योन्यं गभीरोक्तिः। संलापः त्वं गृहाण धनुरित्यादिना च।

**अथोत्थापकः।**

उत्थापकस्तु यत्रादौ युद्धायोत्थापयेत् परम्।[७७३]

यथा प्रकृते गभीरधीरमधुरैर्वचनैरत्यादिना मादृशोऽपि कथमस्तु कथादिवदित्यादिना।

**अथ सङ्घात्यः।**

मन्त्रार्थदैवशक्त्यादेः सङ्घात्यः सङ्घभेदनम्।[७७४]

यथा प्रकृते दैवशक्त्या रावणाद् विभीषणस्य भेदः। मुद्राराक्षसे राक्षससहायानां मन्त्रशक्त्या भेदनम्। अथाशक्त्यापि तत्रैव।

**अथ परिवर्तकः।**

प्रारब्धादन्यकार्यस्य करणं परिवर्तकः।[७७५]
प्रारब्धोत्थान कार्यान्करणात्यपरिवर्तकः।।

यथा प्रकृते – पश्यतस्तव तनुं मनोहरामित्यादि पद्येन।

**अथारभटी।**

एभिरङ्गैश्चतुर्धेयं सात्त्वत्यारभटी पुनः।
मायेन्द्रजालसङ्ग्रामक्रोधोद्भ्रान्तादिचेष्टितैः।
सङ्क्षिप्तिका स्यात् संस्फोटो वस्तूत्थानावपातने।[७७६]
मायामन्त्रेबलेनापि नवस्तुप्रकाशनम्।

तदेवतन्त्रबलेनेन्द्रजालम्। तत्र

सङ्क्षिप्तवस्तुरचना सङ्क्षिप्तिः शिल्पयोगतः।
पूर्वनेतृनिवृत्त्यान्ये नेत्रान्तरपरिग्रहम्।[७७७]

मृद्वंशदलचर्मादिद्रव्ययोगेन वस्तूत्थापनम् सङ्क्षिप्तिः। यथा उदयनचरिते – किलिञ्जहस्तिप्रयोगः।[७७८]

---

[७७३] DR II.54.

[७७४] DR II.54a.

[७७५] DR II.55b.

[७७६] DR II.56.

[७७७] DR II.57b-58a.

[७७८] Dhanika on DR II.58a.

नेतृपदमवस्थापरम्। पूर्वावस्थानिवृत्या नायकस्यावस्थान्तरपरिग्रहः संङ्क्षिप्तिरित्यन्ये। यथा प्रकृते बालिनिवृतौ सुग्रीवस्यान्यावस्थाग्रहः।

यथा च परशुरामस्याहृत्य निवृत्या शान्तत्वपरिग्रहणम्, तेजस्विनस्तात तवैव तेजसेत्यादिना।।

**अथ संस्फोटः।**

संस्फोटस्तु समाघातः क्रुद्धसंरब्धयोर्द्वयोः।[१७९]

यथा प्रकृते लक्ष्मणमेघनादयोः। मालत्यां माधवाघोरघण्टयोः।

**अथ वस्तूत्थापनम्।**

मायाद्युत्थापितं वस्तु वस्तूत्थापनमिष्यते।[१८०]

यथा प्रकृते रामः सुवर्णस्य मृगस्य पश्चादित्यादिना। रत्नावल्याम् इन्द्र-जालेनाग्न्युत्थापनम्।

**अथावपातः।**

अवपातस्तु निष्क्रामप्रवेशत्रासविद्रवैः।[१८१]

यथा प्रकृते तथापि रघुध्वजप्रसादेनेत्यादि विष्कम्भम्।

रत्नावल्याम् - नष्टं वर्षवरैर्मनुष्यगणनाभावादित्याद्यन्तेन।

अथ भारती। प्ररोचनाप्रस्तावनावीथीप्रहसनाख्यैश्चतुर्भिरङ्गैरुपलक्षिता संस्कृत-बहुलोऽल्पप्राकृतः प्राधान्येन शब्दनिष्ठो व्यापारो भारतीवृत्तिः। तदुक्तम् -

भारती संस्कृतप्रायोवाग्व्यापारो नटाश्रयः।
भेदैः प्ररोचनायुक्तैर्वीथीप्रहसनामुखैः।।[१८२]

प्रहसनं हास्यम्। वीथीशब्देन वीथ्यङ्गानि। तत्र प्रकृते प्ररोचनाप्रस्तावने दर्शिते एव। प्रहसनं च गोमुखादिवाक्ये व्यक्तमेव।

**अथ वीथ्यङ्गानि।**

उद्घात्यकावगलिते प्रपञ्चत्रिगते छलम्।
वाक्केल्यधिबले गण्डमवस्यन्दितनालिके।

---

१७९ DR II.58b.

१८० DR II.59a.

१८१ DR II.59b.

१८२ DR III.5.

असत्प्रलापव्याहारमृदवानि त्रयोदश।।[१८३]

तत्र

गूढार्थपदपर्याया माला प्रश्नोत्तरस्य च।
यत्रोऽन्योन्यसमालापो द्विधोद्घात्यं तदुच्यते।।[१८४]

गूढार्थपदानां तत्पर्यायानां च माला प्रश्नोत्तरस्य च मालेति द्वैविध्यम्। आद्यं यथा प्रकृते गोमुखः – कहं संधिअओअं बीजाणादीत्यादिना सन्धिविषयप्रयोग इत्यन्तेन। विक्रमोर्वश्यां विदूषकः – वअस्स को एसो कामो जेण तुमं इदुमिज्जं से इत्यादिना गूढार्थकामपदस्य तद्विषयकरूपपर्यायपदानां च माला। द्वितीयं यथा पाण्डवानन्दे

का श्लाघ्या गुणिनां क्षमा, परिभवः कोपः स्वकुल्यैः कृतः
किं दुःखं परसंश्रयो जगति कः श्लाघ्यो य आश्रीयते।
को मृत्युर्व्यसनं शुचं जहति के यैर्निर्जिताः शत्रवः
कैर्विज्ञातमिदं विराटनगरं छन्नस्थितैः पाण्डवैः।।[१८५]

अथावगलितम्।

यथैकत्र समावेशात् कार्यमन्यत् प्रसाध्यते।
प्रस्तुतेऽन्यत्र वाऽन्यत्स्यात् तच्चावगलितं द्विधा।।[१८६]

यत्रैकस्मिन् कार्ये किञ्चिद् विलक्षणान्यकार्यस्य समावेश इत्येकम्। अन्यस्मिन् कार्ये प्रस्तुते क्रियमाणे कार्यान्तरसिद्धिर्द्वितीयम्। आद्यं यथा प्रकृते कैकेयीजन्यवनगमने समं प्रजानामवनं वनं वेत्यादिदर्शितान्यजन्यकिञ्चिद्विलक्षण-वनगमनरूपकार्यस्य समावेशः। उत्तरचरिते सीताया गर्भदोहदजन्यवनगमने जनापवादजन्यवनगमनस्य समावेशः। द्वितीयं यथा प्रकृते – सारिकापृष्ठानुधावनकार्ये रामदर्शनरूपकार्यान्तरसिद्धिः।

अथ प्रपञ्चः।

असद्भूतं मिथः स्तोत्रं प्रपञ्चो हास्यकृन्मतः।[१८७]

यथा प्रकृते रामः बिवुधालये वाचस्पतिरित्यादिना मिथ्याभूता रामगोमुखयोर्मिथः स्तुतिः।

---

[१८३] DR III.12b-13a.

[१८४] DR III.13b-14a.

[१८५] Q. in DR III.5.

[१८६] DR III.14b-15a.

[१८७] DR III.15b.

त्रिगतम्।

श्रुतिसाम्यादनेकार्थयोजनं त्रिगतं त्विह।[१८८]
श्रुतिः स्वतः। यथा विक्रमोर्वश्याम्।
मत्तानां कुसुमरसेन षट्पदानां
शब्दोऽयं परभृतनाद एव धीरः।
कैलासे सुरगणसेविते समन्ताम्
किं नार्यः[१८९] कलमधुराक्षरं प्रगीताः।[१९०]

तत्रैव वा –

सर्वक्षितिभृतां नाथ दृष्टा सर्वाङ्गसुन्दरी।
रामा रम्ये वनान्तेऽस्मिन् मया विरहिता त्वया।।[१९१]

नेपथ्ये तथैव प्रतिशब्दः। राजा किं दृष्टेत्याह। तत्र प्रतिशब्देन त्वया विरहिता मया दृष्टेत्यादिकेन द्वितीयार्थेनानेकार्थता।

अथ छलम्।

प्रियाभै[१९२]रप्रियैर्वाक्यैर्विलोभ्य छलनात् छलम्।[१९३]

यथा प्रकृते हैहयेन हरिणेत्यादिपद्येन। वेण्याम् कर्ता द्यूतच्छलानां जतुमयशरणोद्दीपनः सोऽभिमानीत्यादिना।[१९४]

अथ वाक्केली।

विनिवृत्यास्य वाक्केलीद्विस्त्रिप्रत्युक्तितोऽपि वा।[१९५] अस्यातिवाक्यस्य प्रक्रान्तस्य साकाङ्क्षस्य विनिवर्तनेन वाक्केली द्वित्रा वा उक्तिप्रत्युक्तयः। आद्या यथा प्रकृते सीता आकण्णिद्दोयण इण्णीदोयणइण्णीत्यादिना उक्तिप्रत्युक्तयः। यथा कामं काम यथावत् करालकल इत्यादिना।

सार्धं कूर्मवरेणेति पद्यान्ते राम- रावणयोरन्योन्यवाक्याधिक्योक्तिरधिबलम्।[१९६]

---

[१८८] DR III.16.

[१८९] Ms. A reads किं नमः।

[१९०] *Vikramorvaśīyam* I.3.

[१९१] *Vikramorvaśīyam* IV.27.

[१९२] Ms. A reads प्रियाभै-।

[१९३] DR III.17b.

[१९४] Veni IV.

[१९५] DR III 17.

[१९६] Ms- Misses अधिबल-अन्योन्यवाक्याधिक्योक्तिः स्पर्धयाऽधिबलं भवेत् । DR III.18a.

**अथ गण्डः।**

गण्डः प्रस्तुतसम्बन्धिभिन्नार्थं सहसोदितम् ।[१९७]

यथा प्रकृते आर्य गृह्यतामित्यादिना वेण्याम् प्रविश्य कञ्चुकी देव भग्नं भग्नमित्यादिना। उत्तरचरिते प्रविश्य प्रतीहारी देव उवत्तितो इत्यादिना च क्रमेण सीतालाभदुर्योधनोरुभङ्गसीताविरहाणां सूचनम् ।

**अथावस्यन्दितम्।**

रसोक्तस्यान्यथाव्याख्या यत्रावस्यन्दितम् हि तत् ।[१९८]

यथा प्रकृते हला कहिं पत्थिदासीत्यादिना। कथं भोदि चित्तगदा एसो इत्यादिना च।

**अथ नालिका**[१९९]

सोपहासनिगूढार्था नालिकैव[२००] प्रहेलिका ।[२०१] प्रश्नोत्तरस्वरूपप्रहेलिकैव नालिकेत्यर्थः ।

यथा प्रकृते - सीता सखि को एसो महुरकंठो? सूनृता - (विहस्य) अअं किर सिविणए उम्मिलाण दिट्ठो हुविस्सदीत्यादिना।

**अथाऽसत्प्रलापः।**

असम्बद्धकथाप्रायोऽसत्प्रलापो यथोत्तरम् ।[२०२]

यथा प्रकृते सूनृता - (सस्मितम्) तदो पहुदि ईरसी भट्टिदारिआ इत्यादिना।

**अथ व्याहारः।**

अन्यार्थमन्त्रव्याहारो हास्यलोभकरं वचः। यथा प्रकृते किं दुक्खिदस्स महसोहा-दंसणेणेत्यादि सीतादर्शनादिफलोपक्षेपकं हास्यलोभकरं गोमुखवचनं व्याहारः।

**अथ मृदवम्।**

दोषा गुणा गुणा दोषा यत्र स्युर्मृदवं हि तत् ।[२०३]

यथा प्रकृते - जधा जधा दुब्बलंगीत्यादिना दौर्बल्य दोषस्य गुणीकारः। दातारं

---

[१९७] DR III.18.

[१९८] DR III.19.

[१९९] Ms. A reads मालिका।

[२००] Ms. A reads मालिका।

[२०१] DR III.19a.

[२०२] DR III.20a.

[२०३] DR III.21a.

कृपणं मन्ये मृतोऽप्यर्थं न मुञ्चति। अदाता पुरुषस्त्यागी धनं सन्त्यज्य गच्छतीत्यत्रोभयमपि। एतानि चाङ्गानि भारतीवृत्त्यङ्गत्वेन नाटके यथासम्भवं विधेयानि। वीथ्यां तु सर्वाण्यपि विधेयानीति बोध्यम्।

अथ प्रवृत्तयः। तत् तद्देशोचिता एता भाषाचेष्टावेशाः प्रवृत्तयः। ज्ञात्वा लोकान्नायकादेः सम्प्रयोज्या यथास्थिति। अथ नाटके दिव्यमर्त्यादिनायकः। शृङ्गारवीररसान्यतमप्राधान्यम्। यथासम्भवं पञ्चादयो दशान्ता यथोक्तलक्षणा अङ्काश्च विधेयाः। तदुक्तम् –

अभिगम्यगुणैर्युक्तो धीरोदात्तः प्रतापवान्।
कीर्तिकामो महोत्साहस्त्रय्यास्नाता महामतिः।[२०४]

प्रख्यातवंशो राजर्षिर्दिव्यो वा यत्र नायकः।
तत् प्रख्यातं विधातव्यं वृत्तमत्राधिकारिकम्।।[२०५]

दिव्यपदेन दिव्यादिव्यस्यापि सङ्ग्रहः। राजर्षयो दुष्यन्ताग्निमित्रादयः। दिव्याः श्रीकृष्णादयः। दिव्यादिव्या आत्मनि नराभिमानिनो रामादयः। धीरोदात्तलक्षणं तु।

महासत्त्वोऽतिगम्भीरः क्षमावानविकत्थनः।
स्थिरो निगूढाहङ्कारो धीरोदात्तो दृढव्रतः।।[२०६]

एको रसोऽङ्गीकर्तव्यः वीरः शृङ्गार एव वा।
अङ्गमन्ये रसाः सर्वे कुर्यान्निर्वहणेऽद्भुतम्।।[२०७]

अनुभावविभावाभ्यां स्थायिना व्यभिचारिभिः।
गृहीतमुक्तैः कर्तव्यमङ्गिनः परिपोषणम्।।[२०८]

गृहीतमुक्तैः परस्परव्यतिषक्तैरित्यर्थः।
न चातिरसतो वस्तु दूरं विच्छिन्नतां नयेत्।
रसं वा न तिरोदध्याद्वस्त्वलङ्कारलक्षणैः।।[२०९]

---

[२०४] DR III.22.

[२०५] DR III.23b-24a.

[२०६] DR II.4.

[२०७] DR III.33b-34a.

[२०८] DR III.31b-32a.

[२०९] DR III.3b-34a tally.

## तत्र शृङ्गारः

रम्यदेशकलाकालवेषभोगादिसेवनैः।
प्रमोदात्मा रतिः सैव यूनोरन्योन्यरक्तयोः।
प्रकृष्यमाणः शृङ्गारो मधुरोऽङ्गविचेष्टितैः।[२१०]

**वीरस्तु।**

वीरः प्रतापविनयाध्यवसायसत्त्वमोहाविषादनयविस्मयविक्रमाद्यैः।
उत्साहभूः स च दयारणदानयोगात् त्रेधा किलात्र मतिगर्वधृतिः प्रहर्षाः।[२११]
आदौ विष्कम्भकं कुर्यादङ्गं वा कार्ययुक्तितः।[२१२]

विष्कम्भकपदं प्रवेशकस्याप्युपलक्षणम्। युक्तिश्चेयम् –

अपेक्षितं परित्यज्य नीरसं वस्तुविस्तरम्।
यदा सन्दर्शयेच्छेषं कुर्याद् विष्कम्भकं तदा।।[२१३]

यथा प्रकृते प्रथमद्वितीयचतुःषष्ठाङ्के विष्कम्भकः।

यदा तु सरसं वस्तु मूलादेव प्रवर्तते।
आदावेव तदाङ्कः स्यादामुखाक्षेपसंश्रयः[२१४]

इति प्रथमाङ्काभिप्रायेण। आमुखसंश्रय इति प्रथमाङ्काभिप्रायेण। आक्षेपसंश्रय इति प्रथमाङ्काभिप्रायेण। आक्षेपसंश्रय इत्यन्याङ्काभिप्रायेण।

यथा प्रकृते तृतीयाङ्कः प्रागङ्कोपलक्षितार्थसंश्रयः।

दूराध्वानं वधं युद्धं राज्यदेशादिविप्लवम्।
संरोधं भोजनं स्नानं सुरतं चानुलेपनम्।
अम्बरग्रहणादीनि प्रत्यक्षाणि न निर्दिशेत्।[२१५]

अङ्के त्वेतानि न बध्नीयाद्विष्कम्भकादिभिः सूचयेदित्यर्थः।

नाधिकारि वधं क्वापि त्याज्यमावश्यकं न च।[२१६]

---

[२१०] DR IV.47b-48a.

[२११] DR IV.72.

[२१२] DR III.28-29.

[२१३] DR 000.28b-29a.

[२१४] DR III.29b-30a.

[२१५] DR III.34b-35b.

[२१६] DR III.35a.

मुख्यनायकवधं तु सूचयेदपि न।

अङ्कस्तु -

प्रत्यक्षनेतृचरितो बिन्दुव्याप्तिपुरस्कृतः।
अङ्को नाना प्रकारार्थसंविधानरसाश्रयः।[२१७]

बिन्दूपक्षिप्तार्थविस्तारपुरस्कृतः। यथा प्रकृते प्रथमाङ्कोऽनुरागबिन्दुविस्तारवाग्। अन्ये त्वेकाङ्कान्तनियतबिन्दुविस्तारवन्तः।

एकाहचरितैकार्थह्यविस्तारपुरस्कृतः।

एकाहचरितैकार्थमित्थं समासन्ननायकम्
पात्रैस्त्रिचतुरैरङ्कं तेषामन्ते स्यान्निर्गमः।[२१८]

इत्थमङ्कं कुर्यादङ्कान्ते चोचितद्विचतुरादिपात्राणां निर्गमः कार्य इत्यर्थः।

पताकास्थानकान्यत्र बिन्दुरन्ते च बीजवान्।
एवमङ्काः प्रकर्तव्याः प्रवेशादिपुरस्कृताः।
पञ्चाङ्कमेतदवरं दशाङ्कं नाटकं परमिति।[२१९]

तत्तदङ्के[२२०] बीजानि व्यक्तान्येव। प्रकृते अङ्कान्ते च नियतो बिन्दुः। यथा प्रथमाङ्कान्ते अवि णाम एणं पुणो वि पेक्खइस्से[२२१] - इति बिन्दुः। द्वितीयाङ्कान्ते चास्यैव विस्तारः। द्वितीयाङ्कान्ते परशुरामो न जीवतीत्यादिना बिन्दुः। तृतीयाङ्कान्ते तदेतदादायेत्यादिना बिन्दुः।

चतुर्थाङ्कान्ते च क्षणं दयार्द्र इत्यादिना बिन्दुः। पञ्चमाङ्कान्ते परं नु देव्या वैदेह्या इत्यादिना बिन्दुः। जानकीजानिरिति जानकीसमागमोपक्षेपको बिन्दुः।[२२२]

अथ दशरूपकाद्भरतमूलको दर्पणे विशेषः एषः।
षट्त्रिंशल्लक्षणान्यत्र नाट्यालङ्कृतयस्तथा।
त्रयस्त्रिंशत्प्रयोज्यानि वीथ्यङ्गानि त्रयोदश।
लास्याङ्गानि दश यथालाभं रसव्यपेक्षया।[२२३]

---

२१७ DR III.3b-31a.

२१८ Comp. एकाहचिरतैकार्थमित्थमासन्ननायकम् । DR III.36

२१९ DR III.37b-38b.

२२० Ms. B reads तत्तदङ्कतः -।

२२१ Ms. B reads पेक्खइस्समिति -।

२२२ Ms. A omits all these three sentences.

२२३ SD VI.169, *lakṣaṇas* are also cited as per SD 170.

अत्र नाटके लक्षणादीनि यथा लाभं प्रयोज्यानीति सम्बन्धः।

## लक्षणविचारः

तत्र लक्षणानि–

भूषणाक्षरसङ्घातौ शोभोदाहरणं तथा।
हेतुसंशयदृष्टान्तास्तुल्यतर्कः पदोच्चयः।
निदर्शनाभिप्रायौ च प्राप्तिस्तथा विचार एव च।

दिष्टोपदिष्टे च गुणातिपातातिशयौ तथा।
विशेषणनिरुक्ती च सिद्धिर्भ्रंशविपर्ययौ।
दाक्षिण्यानुययौ मालार्थापत्तिर्गर्हणं तथा।
पृच्छाप्रसिद्धिसारूप्यं संक्षेपो गुणकीर्तनम्।
लेशो मनोरथोनुक्तसिद्धिः प्रियवचस्तथा।

तत्र –

उपमाद्यैरलङ्कारैर्गुणयोगस्तु भूषणम्।[२२४]
यथा प्रकृते विअसिअसिअवारिअपणो इत्यादिना।
वर्णनाऽक्षरसङ्घातो द्वित्रार्थैरक्षरैर्मितैः।[२२५] यथा कथं भोदि चित्तगदो एसि।
सिद्धैरर्थैः समं यत्र प्रसिद्धोऽर्थः प्रकाशते।
श्लिष्टलक्षणचित्रार्था सा शोभेत्यभिधीयते।[२२६]
यथा रे बाण तवाधिज्ये धनुषीत्यादिना।
यत्र तुल्यार्थयुक्तेन वाक्येनातिप्रदर्शनात्।
साध्यतेऽभिमतश्चार्थस्तदुदाहरणं मतम्।[२२७]
यथा सिंहासनारोहणमित्यादिना।
हेतुर्वाक्यं समासोक्तमिष्टकृद्धेतुदर्शनात्।[२२८]

यथा प्राणाः प्रयान्तु मनसापीत्यादिना। संशयो ज्ञाततत्त्वस्य वाक्यस्य

---

[२२४] NŚ/SD II.170.

[२२५] SD VI.172.

[२२६] NŚ XVI.8 Q / SD VI.173.

[२२७] NŚ XVI.9 (अनुबन्ध), SD VI.174

[२२८] NŚ XVI.10 (अनुबन्ध), SD VI.175.

स्यादनिश्चयः ।[२२९] यथापुष्पन्धयव्रातविचित्रशोभेत्यादिना ।

दृष्टान्तो यत्तु चातुर्यसाधनाय निदर्शनः ।[२३०] यथा परीक्षकाणां परिषदित्यादिना ।
तुल्यतर्को यदर्थेन तर्कः प्रकृतगामिना ।[२३१]

यथा तत्तमेव दिनकरकरकुलेत्यादिना ।
सञ्चयोऽर्थानुरूपो यः पदानां स पदोच्चयः ।[२३२]
यथा – परिम्लानैरङ्गैरित्यादिना ।
यथार्थानां प्रसिद्धानां क्रियते परिकीर्तनम् ।
परपक्षव्युदासार्थं तन्निदर्शनमुच्यते ।[२३३]
यथा कहिअ विस्मय इत्यादिना ।
अभिप्रायस्तु सादृश्यादभूतार्थप्रकल्पना ।[२३४]
यथा येनानेन द्वीपेनेवाष्टमेनेत्यादिना ।
प्राप्तिः केनचिदंशेन किञ्चिद्यत्रानुमीयते[२३५]
यथा यत्र किञ्चिदाकारसाधर्म्येणेत्यादिना ।
विचारो युक्तिवाक्यैर्यदप्रत्यक्षार्थ साधनम् ।[२३६]
यथा – श्लोकवाचनानन्तरमेवेत्यादिना ।
देशकालस्वरूपेण वर्णना दृष्टमुच्यते ।[२३७]
यथा – आर्य तदिह विश्रामसुखमनुभूयतामित्यन्तेन ।
उपदिष्टं मनोहारि वाक्यं शास्त्रानुसारतः ।[२३८]
यथा कस्मिन् कुले किल जनुरित्यादिना ।
गुणातिपातः कार्यं यद्विपरीतं गुणान् प्रति । ।[२३९]

---

२२९ It is संशय in NŚ XVI.1 (अनुबन्ध).

२३० NŚ XVI.12 (अनुबन्ध) and SD VI.177.

२३१ NŚ XVI.21 (अनुबन्ध), SD VI.178.

२३२ NŚ XVI.18, NŚ XVI. 22 (अनुबन्ध), SD VI.179.

गुणैर्बहुभिरेकार्थैः पदैर्यः सम्प्रशस्यते ।
पदोच्चयं तु तं विद्यान्नानार्थग्रथनात्मकम् ।। NŚ XVI.18

२३३ NŚ XVI.15 (अनुबन्ध), SD VI.180.

२३४ NŚ XVI.14 (अनुबन्ध), SD VI.181.

२३५ NŚ XVI.13 (अनुबन्ध), SD VI.182.

२३६ NŚ XVI.25 (अनुबन्ध), SD VI.183.

२३७ NŚ XVI.23 (अनुबन्ध), SD VI.184.

२३८ NŚ XVI.24 (अनुबन्ध), SD VI.185.

२३९ NŚ XVI.13, SD VI.186. It is गुणानुवाद in NŚ.

यथा सर्वेषु सन्तापभरो वियोग इत्यादिना।

यः सामान्यगुणोद्रेकः स गुणातिशयो मतः।[२४०]

यथा – यत्राङ्गके सम्पततीह दृष्टिरित्यादिना।

अर्थान् सिद्धान् बहूनुक्त्वा विशेषोक्तिर्विशेषणम्।।[२४१]

यथा – तदिदानीं परां कोटिमित्यादिना।

पूर्वसिद्धार्थकथनं निरुक्तिरिति कीर्त्यते।।[२४२]

पूर्वव्युत्पादितार्थकथनम्। यथा – पावकोऽन्वर्थतामेति।

बहूनां कीर्तनं सिद्धिरभिप्रेतार्थसिद्धये।[२४३]

यथा ह्येषन्ते रम्यहर्म्य इत्यादिना।

दृप्तादीनां भवेद् भ्रंशो वाच्यादन्यतरद्वचः।[२४४]

यथा – अनुकूलमपि विधिं बलात् प्रतिकूलयत इत्यादिना।

विचारस्यान्यथाभावः सन्देहानुविपर्यय्यः।[२४५] यथा तदेनं लोचनकोरेत्यादिना।

दाक्षिण्यं चेष्टया वाचा परचित्तानुवर्तनम्। यथा भगवन् कस्येदं क्षीरनीर-निधेरिवेत्यादिना तदेनं लोचनकोरेत्यादिना।

वाक्यैः स्निग्धैरनुनयो भवेदर्थस्य साधनम्।[२४६]

यथा – प्रिये लीलायामलीकवचनेनेत्यादिना।

माला स्याद्यभीष्टार्थनैकार्थप्रतिपादनम्।[२४७]

यथा – पारे प्रयातु जलधेरित्यादिना।

अर्थापत्तिर्यदन्योऽर्थोऽर्थान्तरोक्तेः प्रतीयते।[२४८]

यथामत्तेभचक्रेत्यादि।

दूषणोद्घोषणा या तु भर्त्सना गर्हणं हि तत्।[२४९]

यथा – सुरङ्गीनिर्गतस्येत्यादिना।

---

[२४०] NŚ XVI.13(b), XVI.20 (अनुबन्ध), SD VI.186. It is अतिशय in NŚ.

[२४१] NŚ XVI.18 (अनुबन्ध), SD VI.188.

[२४२] NŚ XVI.24 (अनुबन्ध), SD VI.189 it is निरुक्त in NŚ.

[२४३] NŚ XVI.17 (अनुबन्ध), SD VI.190.

[२४४] NŚ XVI.27 (अनुबन्ध), SD VI.191.

[२४५] NŚ XVI.26 (अनुबन्ध), SD VI.192.

[२४६] NŚ XVI.158 (अनुबन्ध), SD VI.194.

[२४७] NŚ XVI.29 (अनुबन्ध), SD VI.195.

[२४८] NŚ XVI.32 (अनुबन्ध), SD VI.196.

[२४९] NŚ XVI.31 (अनुबन्ध), SD VI.197.

अभ्यर्थनापरैर्वाक्यैः पृच्छार्थान्वेषणं मता।[२५०]
यथा - अहं अनारिसीमित्यादिना।
प्रसिद्धिर्लोकसिद्धार्थैरुत्कृष्टैरर्थसाधनैः।[२५१]
यथा चण्डांशोः कुलमण्डनेत्यादिना।
सासूयमनुभूतस्य सारूप्यात् कोपवर्धनम्।
यथा छद्मनाऽपि मृगो हेतुरित्यादिना।

सङ्क्षेपः सोऽतिसंक्षेपाद् यत्वन्यार्थे प्रयुज्यते।[२५२]
यथा तदपि निकटवर्ति जानीहीति।
गुणानां कीर्तनं यत्तु तदेव गुणकीर्तनम्।[२५३]
यथा सौजन्यं सहजमित्यादिना।
स लेशो भण्यते वाक्यं यत्सादृश्यपुरस्सरम्।[२५४]
यथा जितेऽपि जैत्रे त्वयीत्यादिना।
मनोरथस्त्वभिप्रायस्योक्तिर्भङ्ग्यन्तरेण वा।
यथा - जेदु जेदु कुमुमिदरत्तासां असंण्णिहिदेत्यादिना।

विशेषार्थे हि प्रस्तावेऽनुक्तसिद्धिरितीर्यते।[२५५]

यथा - अनेन पणस्य भङ्गोऽपि कर्तुं शक्य इत्यादिना।

स्यात् प्रमाणयितुं पूज्यं प्रियोक्तिर्हर्षभाषणम्।[२५६]

यथा महानयमनुग्रहो रघुकुलस्येति।

## नाट्यालङ्कारविचारः

**अथ नाट्यालङ्काराः।**

आशीराक्रन्दकपटाक्षमागर्वोद्यमाश्रयाः।
उत्प्रासनं स्पृहाक्षोभः पश्चात्तापोपपत्तयः।
आशंसाध्यवसायौ च विसर्पोल्लेखसंज्ञितौ।

---

२५० NŚ XVI.34 (अनुबन्ध), SD VI.198.

२५१ NŚ XVI.33 (अनुबन्ध), SD VI.199.

२५२ Not given in NŚ. SD VI.201.

२५३ NŚ XVI.169, SD VI.202.

२५४ NŚ XVI.37 (अनुबन्ध), SD VI.203.

२५५ NŚ XVI.40 (अनुबन्ध), SD VI.205.

२५६ NŚ XVI.41 (अनुबन्ध), SD VI.206. It is प्रियोक्ति is also termed as प्रियं वचनम् in NŚ and SD in अनुबन्ध।

उत्तेजनं परीवादोनीतिरर्थविशेषणम्।
प्रोत्साहनं च साहाय्यमभिमानोऽनुवर्तनम्।
उत्कीर्तनं तथा याच्ञा परिहारो निवेदनम्।
प्रवर्तनाख्यानयुक्तिप्रहर्षाश्चोपदेशनम्।।

इति नाट्यालङ्कृतयो नाट्यभाषणहेतवः।[२५७]
आशीरिष्टजनाशंसा क्रन्दः प्रलपितं शुचा।[२५८]
कपटं मायया यत्र रूपमन्यद्विभाव्यते।[२५९]
अक्षमा सा परिभवः स्वल्पं यत्र विपद्यते।[२६०]
गर्वोऽवलेपजं वाक्यं कार्यस्यारम्भ उद्यमः।[२६१]
ग्रहणं गुणवत्कार्यहेतोराश्रय उच्यते।[२६२]
यथा - तेन तेन च तप्तानामित्यादिना।
उत्प्रासनं तूपहासो योऽसाधौ साधुमानिनि।[२६३]
यथा - हैहेयेन हरिणेत्यादिना।
आकाङ्क्षा रमणीयत्वाद् वस्तुनो या स्पृहा तु सा।[२६४]
अधिक्षेपवचःकारी क्षोभः प्रोक्तः स एव तु।[२६५]
मोहोऽवधीरितार्थस्य पश्चातापः स एव तु।[२६६]
उपपत्तिर्मताहेतोरुपन्यासोऽर्थसिद्धये।[२६७]
यथा सम्भावितो भृगुपतिरित्यादिना।
आशंसनं स्यादाशंसा यथा - अविणाम एणं पुणो वि पेक्खिस्समिति।

प्रतिज्ञा ध्यवसायकः।[२६८]
विसर्पो यत् समारब्धं कर्मानिष्टफलप्रदम्। यथा - सीताहरणरूपं कर्म।

---

२५७ SD VI.195-98.
२५८ SD VI.208.
२५९ SD VI.209.
२६० SD VI.210.
२६१ SD VI.212-13.
२६२ SD VI.214.
२६३ SD VI.215.
२६४ SD VI.216.
२६५ SD VI.217.
२६६ SD VI.218.
२६७ SD VI.219.
२६८ SD VI.221.

कार्यदर्शनमुल्लेखः।[२६९] यथा – क्व पुनरिदानीं दाशरथी?
उत्तेजनमितीष्यते स्वकार्यसिद्धयेऽन्यस्य प्रेरणाय कठोरवाक्।[२७०]
यथा – पूज्य भार्गव करोषीत्यादिना।
अभिज्ञापः परीवादः[२७१] नीतिः शास्त्रेण वर्तनम्।[२७२]
उक्तस्यार्थस्य यत्तु स्यादुत्कीर्तनमनेकधा।।[२७३]

उपालम्भस्वरूपेण तत् स्यादर्थविशेषणम्।।[२७४]

यथा – एकविंशतिमितितः समर्पित इत्यादिना।
प्रोत्साहनं स्यादुत्साहगिरा कस्यापि योजनम्।[२७५]
साहाय्यं सङ्कटे यत् स्यादानुगुण्यं परस्य च।[२७६]
अभिमानः स एव स्यात् प्रश्रयादनुवर्तनम्।[२७७]
अनुवृत्तिरनुभूताख्यानमुत्कीर्तनं मतम्।[२७८]
यथा स्पृशति मयि करेणेत्यादिना।
याच्ञा तु क्वापि याच्ञाया स्वयं दूतमुखेन वा।[२७९]
परिहार इति प्रोक्तः कृतानुचितमार्जनम्।[२८०]
यथा – ऊर्ध्वं न शक्नोमीत्यादीना।
अवधारितकर्तव्यकथनं तु निवेदनम्।[२८१]
प्रवर्तनं तु कार्यस्य यत् स्यात् साधु प्रवर्तृतनम्।[२८२]
यथा – अभिषेकमुहूर्तमित्यादिना।

---

२६९ SD VI.223.
२७० SD VI.224.
२७१ SD VI.225. Instead of अभिज्ञापः परीवादः SD gives भर्त्स्ना तु परीवादः।
२७२ SD VI.225.
२७३ SD VI.227.
२७४ SD VI.227.
२७५ SD VI.228.
२७६ SD VI.229.
२७७ SD VI.230.
२७८ SD VI.232. Variant in SD "भूतकार्याख्यानमुत्कीर्तनं मतम्"।
२७९ SD VI.233.
२८० SD VI.234.
२८१ SD VI.235.
२८२ SD VI.236.

आख्यानं पूर्ववृत्तोक्तिः।[२८३]
यथा प्रेत्य सम्प्रति यन्न दैन्येत्यादिना।
युक्तिरर्थावधारणम्।[२८४]
यथा - कहं मए सहाएणेत्यादिना।
प्रहर्षः प्रमदाद् वाक्यम्।[२८५]
यथा - कस्यायं दिवसः कतिचित्यादिना।
शिक्षा स्यादुपदेशनम्।[२८६]
लोकानुसारिणीति विशेषः।

अन्येषामन्वर्थानामुदाहरणानि प्रकृते सुव्यक्तान्येव। अणुरपि विशेषोऽध्यवसायकर इति न्यायान्नाट्यालङ्कारलक्षणविशेषाणां यत्किञ्चिद्भेदमादायैव भेदेन व्यपदेशः। एषु च केषाञ्चिदुपमाद्यलङ्कारगुणभावविशेषान्तर्भावेऽप्यन्तर्भूतानि तानि नाटकेऽवश्यं कर्तव्यानीति। नित्यत्वाबोधिका वीक्षावद्भूतस्य पुनरुक्तिः। एवं च सर्वं सन्धिसाधारणत्वाद् बीजानुविधायित्वानियमाच्च सन्ध्यङ्गविशेषान्तर्भावोऽपि केषाञ्चिन्निरस्त इति निष्कर्षः। वीथ्यङ्गानि तूक्तान्येव।

## लास्याङ्गविचारः

**अथ लास्याङ्गानि।**

गेयपदं स्थितपाठ्यमासीनं पुष्पगण्डिका।
प्रच्छन्दकस्त्रिगूढं च सैन्धावाख्यं द्विगूढकम्।
उत्तमोत्तमकं चान्यदुक्तप्रत्युक्तमेव च।
लास्ये दशविधं ह्येतदङ्गनिर्देशलक्षणम्।।[२८७]

तन्त्री भाण्डं पुरस्कृत्योपविष्टस्यासने पुरः।
शुष्कं गानं गेयपदं स्थितपाठ्यं तदुच्यते।[२८८]
मदेनोत्तापिता यत्र पठति प्राकृतं स्थिता।
निखिलातोद्यरहितं शोकचिन्तान्विताऽबला।

---

[२८३] SD VI.237.
[२८४] SD VI.238.
[२८५] SD VI.239.
[२८६] SD VI.240.
[२८७] Comp. NŚ IXX.119-37, प्रच्छन्दक is प्रच्छेदक in SD. The last line in SD is लास्ये दशविधं ह्येतदङ्गमुक्तम् मनीषिभिः।
[२८८] SD VI.243.

अप्रसारितगात्रं यदासीनासीनमेव च।[२८९]
आतोद्यमिश्रितं गेयं छन्दांसि विविधानि च।
स्त्रीपुंसयोर्विपर्यासचेष्टितं पुष्पगण्डिका।[२९०]
अन्यासक्तं पतिं मत्वा प्रेमविच्छेदमन्युना।
वीणापुरस्सरं गानं स्त्रियाः प्रच्छन्दको मतः[२९१]
स्त्रीवेषधारिणां पुंसा नाट्यं श्लक्ष्णं त्रिगूढकम्।[२९२]
यथा मालत्यां मकरन्दस्य मालतीवेषधारणम्।
कश्चन भ्रष्टसङ्केतः सुव्यक्तकरणान्वितः।
प्राकृतं वचनं वक्ति यत्र तत् सैन्धवं विदुः।[२९३]
करणं वीणादिक्रिया।
चतुरस्रपदं गीतं मुखप्रतिमुखान्वितम्।
द्विगूढरसभावाढ्यमुत्तमोत्तमकं विदुः।।[२९४]

कोपप्रसादजमधिक्षेपयुक्तरसोत्तरम्।
हावहेलान्वितं चित्रश्लोकबन्धमनोहरम्।
उक्तिप्रत्युक्तिसंयुक्तं सोपालम्भमलीकवत्।
विलासान्वितगीतार्थमुक्तमित्युक्तमुच्यते।।[२९५]

नाटके त्वेषां नियमो भाणे चानियम इति।

## सन्ध्यन्तरविचारः

अथ सन्ध्यन्तराख्याण्यङ्गानि। तत्र भरतः।
अन्तराणि च सन्धीनां विधेयान्येकविंशतिः।[२९६]
साम भेदस्तथा दण्डः प्रदानं वध एव च।
प्रत्युत्पन्नमतित्वं च गोत्रस्खलनमेव च।।

साहसं च भयं चैव धीर्माया क्रोध एव च।

---

२८९ SD VI.244.
२९० SD VI.245.
२९१ SD VI.246 – प्रच्छेदको मतः।
२९२ SD VI.247.
२९३ SD VI.248.
२९४ SD.VI.248.
२९५ SD.VI.251.
२९६ NŚ IXX.107a.

ओजः संवरणं भ्रान्तिस्तथा हेत्ववधारणम्।
दूतोल्लेखस्तथा स्वप्नश्चित्रं मद इति स्मृतः।[२९७]
प्रसिद्धानामेषामुदाहणानि प्रकृते त्वष्टान्येव। (दृष्टान्येव)
इति नाटकलक्षणम्।

## प्रकरणादिविचारः

नाटकं सप्रकरणं भाणः प्रहसनं डिमः।
व्यायोगसमवकारौ वीथ्यङ्केहामृगा[२९८] इतीति क्रमप्राप्तमथ प्रकरणम्।

तत्रामात्यादिः सविघ्नकार्यसिद्धिर्धीरशान्तो नायकः उत्पाद्यमितिवृत्तं शृङ्गारोऽङ्गी। कुलाङ्गना वेश्या उभया चेति त्रेधा नायिका – तदुक्तम् –

अथ प्रकरणे वृत्तमुत्पाद्यं लोकसंश्रयम्।
अमात्यविप्रवणिजामेकं कुर्याच्च नायकम्।
धीरप्रशान्तं सापायं धर्मकर्मार्थतत्परम्।
शेषं नाटकवत् सन्धिप्रवेशकरसादिकम्।।[२९९]

धीरशान्तलक्षणं तु –

सामान्यगुणयुक्तस्तु धीरशान्तो द्विजादिकः।[३००]
नायिका द्विधा नेतुः कुलस्त्री गणिका तथा।
क्वचिदेकैव कुलजा वेश्या क्वापि द्वयं क्वचित्।
कुलजाभ्यन्तरा बाह्या वेश्या नातिक्रमोऽनयोः।
आभिः प्रकरणं त्रेधा सङ्कीर्णं धूर्तसङ्कुलम्।
कितवद्यूतकारादिविटचेटकसङ्कुलम्।[३०१]
मृच्छकटिकादिवत् सङ्कीर्णम्।
प्रकरणं तु नायकरसभेदेन रूपकारणमन्योन्यं भेद इति बोध्यम्।
अथ भाणः।
भाणस्तु धूर्तचरितं स्वानुभूतं परेण वा।

---

[२९७] NŚ IXX.106b–109b.

[२९८] Comp. – नाटकं सप्रकरणमङ्को व्यायोग एव च।
भाणः समवकारश्च वीथी प्रहसनं डिमः।।
ईहामृगश्च विज्ञेया दशेमे नाट्यलक्षणे।। NŚ XVIII.2-3

[२९९] DR III.39-40.

[३००] DR II.4.

[३०१] DR II.41-42.

यत्रोपवर्णयेदेको निपुणं पण्डितो विटः।
सम्बोधनोक्तिप्रत्युक्तीः कुर्यादाकाशभाषितैः।
सूचयेद्वीरशृङ्गारौ शौर्यसौभाग्यवर्णनैः।
भूयसा भारतीवृत्तिरेकाङ्कं वस्तुकल्पितम्।
मुखनिर्वहणे साङ्गे लास्याङ्गानि दशापि चेत्।।[३०२]

धूर्ताश्चौरद्यूतकारादयः। सुस्पष्टमन्यत्।

**अथ प्रहसनम्।**

तत्र भाणवद् वस्तुसध्यङ्कलास्याङ्गादयः। हास्यरसोऽङ्गी तस्य विभावाश्च तदुचितसरलतापसविप्रशाक्यनिर्ग्रन्थभिक्षुकादयः। तदुक्तम् –

तद्वत् प्रहसनं त्रेधा शुद्धवैकृतसङ्करैः।[३०३]
तद्वत् भाणवत्। तत्र शुद्धम् –
पाखण्डिविप्रप्रभृतिचेटचेटीविटाकुलम्
चेष्टितं देशभाषादि शुद्धं हास्यवचोन्वितम्।[३०४]
विकृतं तु –
कामुकादिवचोवेषैः षण्ढकञ्चुकितापसैः।
विकृतं सङ्कराद्वीथ्या[३०५] सङ्कीर्णं धूर्तसङ्कुलम्।[३०६]

कामुकादयो भुजङ्गचारणभट्टाद्याः। अत्र षण्ढतापसादीनां स्वेतरभट्टचारणाद्या-ग्वेषधारितत्वेन विक्षतत्वाद्विकृतं प्रहसनम्। पूर्वत्र त्वन्यवाग्वेषाद्याधारितेन शुद्धत्वम्। यथालाभं वीथ्यङ्गैस्तु सङ्कीर्णत्वात् सङ्कीर्णम् किञ्च शुद्धविकृतयोः सङ्करादपि सङ्कीर्णं बोध्यम्।

रसस्तु भूयसा कार्यः षड्विधो हास्य एव तु।[३०७]

**हास्यरसस्तु –**

विकृताकृतिवाग्वेषैरात्मनोऽथ परस्य वा।
हास्यः स्यात् पारपोषोऽस्य हास्यस्त्रिप्रकृतिः स्मृतः।[३०८]

---

३०२ DR III.49-51 DR reads दशापि च।

३०३ DR III.53a.

३०४ DR III.53b-54a.

३०५ वाच्याः इति क मातृकायाम्।

३०६ DR III.55b-56a.

३०७ DR III.56b.

३०८ DR IV.75.

द्विविधोऽपि त्रिप्रकृतिः उत्तममध्यमाधम प्रकृतिभेदादेव षड्विधः।

**अथ डिमः।**

तत्र प्रख्यातमितिवृत्तम्, अत्यन्तोद्धतदेवगन्धर्वादयः षोडशनायकाः। हास्य-शृङ्गाराभावेन कैशिकीवृत्त्यभावः। न्यायप्राप्तो रौद्ररसश्चाङ्गी। तदुक्तम् -

डिमे वस्तु प्रसिद्धं स्याद् वृत्तयः कैशिकीं विना।
नेतारो देवगन्धर्वयक्षरक्षोमहोरगाः।
भूतप्रेतपिशाचाद्याः षोडशात्यन्तमुद्धताः।
रसैरहास्यशृङ्गारैः षड्भिर्दीप्तैः समन्विताः।
मायेन्द्रजालसङ्ग्रामक्रोधोद्भ्रान्तादिचेष्टितैः।
चन्द्रसूर्योपरागाद्यैर्न्याय्ये रौद्ररसेऽङ्गिनि।
चतुरङ्कश्चतुस्सन्धि निर्विमर्शो डिमः स्मृतः।[३०९]

अत्रोदाहरणं त्रिपुरदाह इति भरतः। रौद्ररसस्तु -

क्रोधो मत्सरवैरिवैकृतभयैः पोषोऽस्य रौद्रोऽनुजः।
क्षोभस्वाधरदंशकम्पभ्रुकुटिस्वेदास्यरागैर्युतः।
युद्धोल्लासविकत्थनांसधरणीघातप्रतिज्ञाग्रहैः
अत्रामर्षमदौ स्मृतिश्चपलतासूयोग्र्यवेगादयः।।[३१०]

**अथ व्यायोगः।**

तत्र हास्यशृङ्गाररहिताः षड्रसाः। रौद्रोऽङ्गी। एकोऽङ्कः। स्त्रीनिमित्त-मितरेतरनिमित्तश्चात्र सङ्ग्रामः।

यथा - पितृवधक्रोधादर्जुनेन समं भार्गवस्य। तदुक्तम् -

ख्यातेतिवृत्तो व्यायोगः ख्यातोद्धतनराश्रयः।
हीनो गर्भविमर्शाभ्यां दीप्ताः स्युर्डिमवद् रसाः।
अस्त्रीनिमित्तसङ्ग्रामो जामदग्न्यजये यथा।
एकाहचरितैकाङ्को व्यायोगो बहुभिर्नरैः[३११] इति।।

**अथ समवकारः।**

तत्र समस्तरूपकपदार्थसाङ्कर्यम्। देवासुरादयो द्वादश नायकाः। तेषां च समुद्रमथन इव लक्ष्म्यादीनि पृथक् पृथक् फलानि। वीरश्चाङ्गी। त्रयोऽङ्काः।

---

३०९ DR III.57-60a.

३१० DR IV.74.

३११ DR III 60b-62a.

तेषां प्रथमश्चतुर्विंशतिघटीनिर्वर्त्योऽतिवृत्तप्रमाणः। क्रमेणाष्टचतुर्घटिकानिर्वर्त्यौ प्रत्यङ्कं चैकेक इति क्रमेण स्वाभाविको दैवतोऽरिकृताश्चेति त्रयः कपटाः, तथा नगरोपरोधजो युद्धजो वा वातादिगजेन्द्रादिजश्चेति त्रयो विद्रवाः। तथा च धर्मार्थकामप्रधानास्त्रयः शृङ्गाराश्च कर्तव्याः। तदुक्तम् -

कार्यं समवकारे[३१२] स्यायादामुखं नाटकादिवत्।

आमुखं आदित आरभ्य कार्यपदार्थाख्यातं तदेवामुखम्। स्तुतिर्विमर्शास्तु सन्धयः।

वृत्तयो मन्दकैशिक्यो नेतारो देवदानवाः।
द्वादशोदात्ता विख्याताः फलं तेषां पृथक् पृथक्।
बहुवीरा रसाः सर्वे यद्वदम्बोधिमन्थने।
अङ्कैस्त्रिभिस्त्रिकपटस्त्रिशृङ्गारस्त्रिविद्रवः।
द्विसन्धिकः प्रथमः कार्यो द्वादशनाडिकः।
चतुर्द्विनाडिकावन्त्यौ नाडिका घटिकाद्वयम्।
वस्तुस्वभावदैवारिकृताः स्युः कपटास्त्रयः।
नगरोपरोधयुद्धवाताग्न्यादित्रिविद्रवाः।
धर्मार्थकामैः शृङ्गारो नात्रबिन्दुप्रवेशकैः।
वीथ्यङ्गानि यथालाभं कुर्यात् प्रहसने यथा।[३१३]

अथ वीथी। तत्र शृङ्गाररसो भूयसा सूच्यः। रसान्तराण्यपि स्वल्पं स्वल्पं स्पर्शनीयानि। कैशिकी च वृत्तिः। प्रागुक्तानि सर्वाणि वीथ्यङ्गानि च। तदुक्तम्।

वीथी तु कैशिकीवृत्तौ सन्ध्यङ्गाङ्कैस्तु भाणवत्।
रसः सूच्यस्तु शृङ्गारः स्पृशेदपि रसान्तरम्।
युक्ता प्रस्तावनाख्यातैरङ्गैरुद्धात्यकादिभिः।
एवं वीथी विधातव्या द्व्येकपात्रप्रयोजितेति।[३१४]

अथोत्सृष्टिकाङ्कापरपर्यायो अङ्कः। तत्रैकोऽङ्कः प्रसिद्धा च कथा। भारत्येव वृत्तिः। तदुक्तम् -

उत्सृष्टिकाङ्के प्रख्यातं वृत्तं बुद्ध्या प्रपञ्चयेत्।
रसस्तु करुणः स्थायी नेतारः प्राकृता नराः।
भाणवत् सन्धिवृत्त्यङ्गैर्युक्तः स्त्रीपरिदेवितैः।

---

३१२ समवकारेऽपि in DR.

३१३ DR III.63-68a.

३१४ DR III.68b-70a.

वाचा युद्धं विधायतव्यं तथा जयपराजयौ।[३१५] इति।

करुणरसस्तु –

इष्टनाशादनिष्टाप्तेः शोकात्मा करुणो मतः।
(स्वापस्मारदैन्याधिमरणालस्यसम्भ्रमाः।)[३१६]
निःश्वासौदास्यरुदितस्तम्भप्रलपितादयः।
विषादजडतोन्मादचिन्ताद्या व्यभिचारिणः।[३१७]

अथेहामृगः। तत्र ख्याताख्यातं वस्तु मुखप्रतिमुखनिर्वहणाख्यास्त्रयः सन्धयश्च। व्यायोगवदत्र वृत्तिः सन्धय इति भरतोक्तेः।

प्रतिनायकश्च विपर्ययज्ञानादयुक्तकारी। तदुक्तम्

मिश्रमीहामृगे वृत्तं चतुरङ्कं त्रिसन्धिकम्।
नरौ दिव्यावनियमान्नायकप्रतिनायकौ।
ख्यातो धीरोद्धतावन्त्यो विपर्यासादयुक्तकृत्।
अन्त्यः प्रतिनायकः। दिव्यस्त्रियमनिच्छन्तीमपहारादिनेच्छतः
शृङ्गाराभासमप्यस्य किञ्चित् किञ्चित् प्रदर्शयेत्।
वधप्राप्तस्य कुर्वीत वधं नैव महात्मन इति।[३१८]
धीरोद्धतलक्षणं तु
दर्पमात्सर्यभूयिष्ठो मायाच्छद्मपरायणः।
धीरोद्धतस्त्वहङ्कारी चलश्चण्डो विकत्थनः।[३१९]
इति दशरूपकलक्षणानि।
अथ प्रसिद्धानि कानिचिदुपरूपकाणि। तत्र रत्नावल्यादिनाटिका।
नाटिका क्लृप्तवृत्ता स्यात् स्त्रीप्राया चतुरङ्किका।
प्रख्यातो धीरललितस्तत्र स्यान्नायको नृपः।
शृङ्गारोऽङ्गी तु मुग्धात्र नायिका नृपनवंशजा।
अन्तःपुरादिसम्बन्धादासन्ना श्रुतिदर्शनैः।
अनुरागो नवावस्थो नेतुस्तस्यां यथोत्तरम्।
नेता तत्र प्रवर्तेत देवीत्रासेन शङ्कितः।
देवी पुनर्भवेज्ज्येष्ठा प्रगल्भा नृपवंशजा।

---

[३१५] DR III.70b-72a.

[३१६] DR IV.81-82.

[३१७] Third line is missing in the Ms. DR III.72b-73a.

[३१८] DR IV.75b.

[३१९] DR II.5b-6a.

पदे पदे मानवतीतद्वशः सङ्गमस्तयोः।
वृत्तिः स्यात् कौशिकी स्वल्पविमर्शाः सन्धयः पुनः।[३२०]
धीरललितलक्षणं तु
निश्चिन्तो धीरललितः कलासक्तः सुखीमृदुः।[३२१]

अथ तोटकम्

सप्ताष्टनवपञ्चाङ्कं दिव्यमानुषसंश्रयम्।
तोटकं नाम तत् प्राहुः सशृङ्गार[३२२] विदूषकम्।[३२३]
सट्टकं प्राकृताशेषपाठ्यं स्यादप्रवेशकम्।
न तु (?) विष्कम्भकोऽप्यत्र प्रचुरश्चाद्भुतो रसः।
अङ्का जवनिकाख्याः स्युः स्यादन्यन्नाटिकासमम्।[३२४]
अद्भुतरसस्तु लोकोत्तरैः पदार्थैः स्याद्विस्मयात्मा रसोऽद्भुतः।
कर्मास्य साधुवादाश्रुवेपथुः स्वेदगद्गदाः।
हर्षावेगधृतिप्राया भवन्ति व्यभिचारिणः।[३२५]

लक्ष्यमत्र कर्पूरमञ्जरी। एवं शेषाणि पञ्चदशोपरूपकाणि ग्रन्थान्तरादनुसर्तव्यानीति।

शाके शरग्रामशरेन्दुतुल्ये (१५३५) ग्रामे वरिष्ठाश्रमतः प्रसिद्धे।
तदेतदौजागरिणा निबद्धं मुदा कवीनां कविसुन्दरेण।
बुधैकबोध्याः सविशेषलेखाः स्थले स्थलेऽस्मिन्निहिता[३२६] विशेषाः।
रम्यातिरम्यं न हि तारतम्यं पुण्येषु पुण्यं धयभिन्नगत्यम्।

।। इति श्री सुन्दरराजमिश्रविरचितो नाट्यप्रदीपं समाप्तिमगमत्। श्रीरस्तु।।[३२७]

---

[३२०] SD VI.281; comp. DR III.43-48; NŚ XVIII.8b& 60b the line देवी पुनर्भवेज्जेष्ठा प्रगल्भा नृपवंशजा occurs in DR (III.45) also, but DR misses the second half.

[३२१] DR II.3.

[३२२] प्रत्यङ्कं in SD.

[३२३] SD VI.282.

[३२४] SD VI.284.

[३२५] DR IV 78b-79a.

[३२६] Ms. B reads – यन्निहिता –।

[३२७] Ms. B adds – श्रीरामार्पणमस्तु। करकृतमपराधं क्षन्तुमर्हन्ति ....।

# Index of Authors and Works Cited

(Digits in Arabic and Roman indicate page numbers in the Preface and the Sanskrit text.)

*Abhijñānśākuntalam* (alternately as *Śakuntalā*), ix, xii, xvi, 6, 11, 15-17, 25
Abhinavagupta, xii, 2 fn, 8
*Abhirāmanaṇi* (alternately cited as *Prakṛta*), ix, xiv-xv, xvii-xxi, 4-14, 16-45, 47
*Arthadyotanikā*, ix

Bharata, xii, xiii, xiii fn, 1-3, 8, 33-34, 48, 56, 59
Bhavabhūti, xvii

*Daśarūpaka*, ix, 3, 5-6, 8-10, 12-31, 33 fn, 34-48, 57-61
Dhanañjaya, xi, xii, xiii
Dhanika, xii, 8, 33-34

Kālidāsa, ix
*Karpūramañjarī*, 62
*Kāvyaprakāśā*, 9
*Kundamālā*, xii, 7

*lakṣaṇas* (thirty-six), 48-52

*Mahāvīracaritam* (also abbreviated as *Vīracarita*), xvii, 35
*Mālatīmadhavam* (also abbreviated as *Mālatī*), xii, 6, 8, 11-14, 17, 19, 26, 35-36
*Mālavikāgnimitra*, xii, xiii, 6, 11-12, 17, 26, 35-36
Mātṛgupta, xii, xiii, 2, 11
*Mudrārākṣasa*, xii, 6, 25
Muni, see Bharata

*Nāṭyaśāstra*, ix, xi, xvii, 1, 22, 31, 49-52 (in fns), 56 fn.

*Pāṇḍavānandam*, xii, 43

Rāghavabhaṭṭa, ix, xvi-xvii, 8
*Rāmāyaṇa*, xvii, 9
*Ratnāvalī*, xii, xiii, 8, 11-12, 15, 34, 42, 61
*Rumāvalī*, 31

*Sāhityadarpaṇa* (also abbreviated as *Darpaṇa*), ix, xv, 4, 9, 48-56 (in fns)
*Svapnavāsavadatta*, xii

*Tripuradāha*, 59
*Udāttarāghavam*, xii, 7
*Udayanacarita*, 41
*Uttararāmacarita* (abbreviated as *Uttaracarita*), 43
*Veṇīsaṁhāra* (also abbreviated as *Veṇī*), xii, xiii, 2, 3, 6, 10-11, 25, 44
*Vikramorvaśīya*, xii, 44
*Viśvanātha*, xi, xv

# Index of Technical Terms


*abhimāna* (a *nāṭyālaṁkāra*), 52, 54
*abhiprāya* (a *lakṣaṇa*), 49-50
*abhūtāharaṇa* (a *sandhyaṅga*), 23
*adhibala* (a *sandhyaṅga*), 23-24
*adhibala* (a *vīthyaṅga*), 42, 44
*ādāna* (a *sandhyaṅga*), 26, 28
*adbhuta rasa*, 39
*ādhikārika vṛtta*, xvii, 7-8
*adhyavasāya* (a *nāṭyālaṁkāra*), 52-53
*ākhyāna* (a *nāṭyālaṁkāra*), 52-54
*ākāśabhāṣita*, 37, 58 (in *bhāṇa* type of play)
*ākranda/ākrandana/kranda* (a *nāṭyālaṁkāra*), 52-53
*akṣamā* (a *nāṭyālaṁkāra*), 52-53
*akṣarasaṁghāta* (a *lakṣaṇa*), 49
*ākṣepa* (a *sandhyaṅga*), 23, 25
*āmantraṇaprakāra*, 38-39
*āmukha*, see *prastāvanā*
*ānanda* (a *sandhyaṅga*), 28-29, 33
*aṅgī rasa*, 46
*aṅka* (an act in a play), 38
*aṅka* (type of play), see *utsṛṣṭīkāṅka*
*aṅkāsya*, 34-35
*aṅkāvatāra*, 34, 36
*anubandhas*, xviii
*anubhāva*, 46
*anuktasiddhi* (a *lakṣaṇa*), 49, 52
*anumāna* (a *sandhyaṅga*), 23-24, 32
*anunaya* (a *lakṣaṇa*), 49, 51
*anusandhis*, xi, xvii, 33-34
*apavāda* (a *sandhyaṅga*), 26-27
*apavārita*, 37
*anuvartana* (a *nāṭyālaṁkāra*), 52-53
*apāya*, xix
*ārabhaṭī vṛtti*, 39, 41-42
*ārambha*, xv, xix, 4, 12, 15, 31
*arthalābha*, xv
*arthāpatti* (a *lakṣaṇa*), 49, 51
*arthaprakṛtis*, xi, xv, xvii, 10-15
*arthaviśeṣaṇa* (a *nāṭyālaṁkāra*), 52-53
*arthopakṣepakas*, 34-35
*āśaṁśā* (a *nāṭyālaṁkāra*), 52-53
*asatpralāpa*, a component of *bhāratī vṛtti/āmukha*, 42, 45
*āśīḥ* (a *nāṭyālaṁkāra*), 52-53
*āsīna* (a *lāsyaṅga*), 55-56
*aśrāvya*, 36-37
*āśraya* (a *nāṭyālaṁkāra*), 52-53
*atiśaya* (a *lakṣaṇa*), 49-50
*avagalita* (a *vīthyaṅga*), 42-43
*avamarśa sandhi*, xv, 8, 15, 25-28, 32, 59 (its absence in *vyāyoga* type of play)
*avapāta/avapātana* (a variety of *ārabhaṭī vṛtti*), 41-42

*avaspandita* (a component of *bhāratīvṛtti/āmukha*), 42, 45
*avasthās*, xi, xvii, xviii, 11
*avataraṇa*, xv, 4

*bhāṇa* (type of play), 57-58
*bhāratī vṛtti*, 3, its *aṅgas*, 7, 39, 42-46
*bhāṣaṇa/bhāṣa* (a *sandhyaṅga*), 28, 30, 33
*bhaya* (a *sandhyantara*), 56-57
*bheda* (a *sandhyaṅga*), 16, 18, 32
*bheda* (a *sandhyantara*), 56
*bhraṁśa* (a *lakṣaṇa*), 49, 51
*bhrānti* (a *sandhyantara*), 57
*bhūṣaṇa* (a *lakṣaṇa*), 49
*bindu*, xv, xx, 9-11, 15, 32, 48
*bīja*, xix, 5, 9, 15-16, 48

*chala* (a *vīthyaṅga*), 42-43
*chalana* (a *sandhyaṅga*), 26-27
*citra* (a *sandhyantara*), 57
*cūlikā*, 6, 34-35

*dākṣiṇya* (a *lakṣaṇa*), 49, 51
*dāna* (a *sandhyantara*), 56
*daṇḍa* (a *sandhyantara*), 56
*daśarūpaka*, xi, 9
*dhiḥ* (a *sandhyantara*), 56-57
*dhīralalita nāyaka*, 61 (in *nāṭikā*), 62 (definition)
*dhīraśānta* (type of hero), 57
*dhīrodātta nāyaka*, 46, 61
*ḍima* (type of play), 57-58
*diṣṭa* (a *lakṣaṇa*), 49-50
*drava* (a *sandhyaṅga*), 26
*dṛṣṭānta* (a *lakṣaṇa*), 49
*dṛśya* (*vastu*), 9, 34
*dūtollekha* (a *sandhyantara*), 57
*dvigūḍhaka* (a *lāsyaṅga*), 55-56
*dyuti* (a *sandhyaṅga*), 26-27, 32

*gaṇḍa* (a component of *bhāratī vṛtti/āmukha*), 42, 45
*garbha* (*sandhi*), xv, xix, 8, 15, 22-25, 32
*garhaṇa* (a *lakṣaṇa*), 49, 51
*garva* (a *nāṭyālaṁkāra*), 52-53
*geyapada* (a *lāsyaṅga*), 55
*gotraskhalana* (a *sandhyantara*), 56-57
*grathana* (a *sandhyaṅga*), 28-29, 33
*guṇakīrtana* (a *lakṣaṇa*), 49-50
*guṇātipāta* (a *lakṣaṇa*), 49-50
*guṇātiśaya* (a *lakṣaṇa*), 49, 52

*hāsya rasa*, 16, 39, 58 (in *prahasana*, six types of *hāsya*), 59 (its absence in *ḍima* and *vyāyoga* type of plays)
*hetu* (a *lakṣaṇa*), 49
*hetvavadhāraṇa* (a *sandhyantara*), 57

*īhāmṛga* (type of play), 57, 61
*itivṛtta*, 7-9

*janānta/janāntika*, 37

*kaiśikī vṛtti*, 39, 62
*kapaṭa* (a *nāṭyālaṁkāra*), 52-55
*kapaṭa* (in *samavakāra* type of play), 60
*karaṇa*, 16, 18

*karuṇa rasa*, xviii, 60 (in *utsṛṣṭikāṅka* type of play), 61 (definition)
*kārya* (as an *arthaprakṛti*), 9
*kathodghāta*, xix, 5-7
*kāvyārthasūcana*, xii
*kāvyalakṣaṇa*(s), xi, xvii, 49-52
*krama* (a *sandhyaṅga*), 23-24
*kranda*, see *ākranda*
*krodh* (a *sandhyantara*), 56-57
*kṛti* (a *sandhyaṅga*), 28, 30
*kṣepa* (a *nāṭyālaṁkāra*), 52-53
*kṣobha* (a *nāṭyālaṁkāra*), 52-53

*lakṣaṇas*, see *kāvyalakṣaṇa*
*lāsyaṅgas* (ten), xi, 48, 55-56, 58 (in *bhāṇa* type of play)
*leśa* (a *lakṣaṇa*), 49, 52

*mada* (a *sandhyantara*), 56-57
*madhuraślokas*, xiv, 3-4
*māgadhī*, 38
*mālā* (a *lakṣaṇa*), 49, 51
*manoratha* (a *lakṣaṇa*), 49, 52
*māyā* (a *sandhyantara*), 56-57
*miśra* (*itivṛtta*), 8, 61 (in *īhāmṛga*)
*mārga* (a *sandhyaṅga*), 23, 32
*mṛdava* (a component of *bhāratī vṛtti/āmukha*), 42, 45
*mukha sandhi*, 5, 15-18, 31-33, 58 (in *bhāṇa* type of play), 61 (in *īhāmṛga* type of play)
*mukhyanāyaka*, 47

*nālikā* (a component of *bhāratī vṛtti/āmukha*), 42, 45
*nāndī*, xi-xv, 1-4
*narma* (a *sandhyaṅga*), 19-20
*narma* (a component of *kaiśikī vṛtti*), 39
*narmagarbha* (a component of *kaiśikī vṛtti*), 39-40
*narmasphañja* (a component of *kaiśikī vṛtti*), 39-40
*narmasphoṭa* (a component of *kaiśikī vṛtti*), 39-40
*narmadyuti* (a *sandhyaṅga*), 19-20
*nāṭaka* (type of play), xvi, 49, 57
*naṭī*, xix
*nāṭikā*, xi, 61
*nāṭyadharma*, 36-37
*naṭyālaṁkāras*, xi, xvii, 48 (thirty-six), 52-55
*nāyaka*, 46, 57 (in *prakaraṇa*), 61 (in *īhāmṛga* and *nāṭikā* types of play)
*nāyikā*, 57 (in *prakaraṇa*), 61 (in *nāṭikā*)
*nidarśana* (a *lakṣaṇa*), 49-50
*nirṇaya* (a *sandhyaṅga*), 28-29
*nirodha* (a *sandhyaṅga*), 19, 21, 32
*nirukti* (a *lakṣaṇa*), 49, 51
*nirvahaṇa sandhi*, 15, 28-33, 58 (in *bhāṇa* type of play)
*nīti* (a *nāṭyālaṁkāra*), 52, 54
*nivedana* (a *nāṭyālaṁkāra*), 52, 54
*niyatāpti*, 12, 14
*niyataśrāvya* (type of *vastu*), 36-37

*ojas* (a *sandhyantara*), 57

*pada* (in *nāndī*), xiii
*paiśācī*, 38

*padoccaya* (a *lakṣaṇa*), 49
*pañcasandhis*, xi
*paribhāṣaṇa* (a *sandhyaṅga*) ix, 28-29
*paribhāvanā* (a *sandhyaṅga*), 16, 18, 32
*parihāra* (a *nāṭyālaṁkāra*), 52, 54
*parikara* (a *sandhyaṅga*), 16, 31, 33
*parinyāsa* (a *sandhyaṅga*), 16-17, 31, 33
*pāripārśvika*, 38
*parisarpa* (a *sandhyaṅga*), 19-20, 32
*parīvāda* (a *nāṭyālaṁkāra*), 52, 54
*parivartaka* (a component of *sāttavtī vṛtti*), 40-41
*paryupāsana* (a *sandhyaṅga*), 19, 21, 29
*paścāttāpa* (a *nāṭyālaṁkāra*), 52-53
*patākā*, xii, xv, xix, 8, 9, 11, 22, 33
*patākānāyaka*, 8
*patākāsthānakas*, xi, xvii, 33-34, 48
*pāthya*, 37
*phalāgama*, 12, 14
*pracchandaka* (a *lāsyaṅga*), 55-56
*pradāna*, see *dāna*
*pradhānaphala*, xvii
*pragamana* (a *sandhyaṅga*), 19-20, 32
*praharṣa* (a *nāṭyālaṁkāra*), 52, 54
*prahasana* (a component of *bhāratī vṛtti/āmukha*), 42
*prakarī*, xii, xvi, xix, 8, 9, 11, 33
*prahasana* (type of play), 57, types of *prahasana*, 58
*prakaraṇa* (type of play), 57
*prakhyāta* (type of plot), xvii, 8-9, 59 (in *ḍima* type of play)
*prapañca* (a *vīthyaṅga*), 42-43
*prāpti* (a *sandhyaṅga*), 16-17
*prāpti* (a *lakṣaṇa*), 49-50
*prāptyāśā*, 12-13
*prarocanā* (a component of *bhāratī vṛtti/āmukha*), xiv, 4, 42
*prarocanā* (a *sandhyaṅga*), 26-27
*prasāda* (a *sandhyaṅga*), 28-29
*prasaṅga* (a *sandhyaṅga*), 26-27
*prāsaṅgika vṛtta*, 7-8
*praśasti*, xx, 28, 31
*prasiddhi* (a *lakṣaṇa*), 49, 52
*prastāvanā*, xi, xv, 3-7, 60 (in *samavakāra* and *vīthī* types of play)
*pratimukha sandhi* xix, 12, 15-16, 19-22, 33, 61 (in *īhāmṛga* type of play)
*pratināyaka*, 61 (in *īhāmṛga*)
*pratyāhāra*, xv, 4
*pratyupannamatitva* (a *sandhyantara*), 56-57
*pravartanā* (a *nāṭyālaṁkāra*), 52-53
*praveśaka*, 34, 36, 47
*pravṛttaka*, 5-6
*pravṛttis*, 46
*prayogātiśaya*, 6-7
*prayatna* (also spelt as *yatna*), 12, 15, 32
*priyavacas* (a *lakṣaṇa*), 49, 52
*priyokti*, see *priyavacas*
*pṛcchā* (a *lakṣaṇa*), 49, 52
*protsāhana* (a *nāṭyālaṁkāra*), 52, 54
*pūrvabhāva* (a *sandhyaṅga*), 28, 30
*pūrvaraṅga*, xi, xv, 4
*puṣpa* (a *sandhyaṅga*), 19, 21, 32-33

*puṣpagaṇḍikā* (a *lāsyaṅga*), 55-56

*rasa* (in *nāṭaka*), 46, 48
*rasadoṣas*, 9
*raudra rasa*, 39, 59 (as *aṅgī* in *ḍima* and *vyāyoga* types of play)
*rūpa* (a *sandhyaṅga*), 23, 32

*sāhasa* (a *sandhyantara*), 56-57
*sāhāyya* (a *nāṭyālaṁkāra*), 52, 54
*saindhava* (a *lāsyaṅga*), 55-56
*śakti* (a *sandhyaṅga*), 26-27
*sāma* (a *sandhyantara*), 56
*samādhāna*, 16, 32
*samavakāra* (type of play), 57
*sambodhanaprakāra*, see *āmantraṇaprakāra*
*sambrama* (a *sandhyaṅga*), 23, 25
*saṁghātya* (a type of *sāttavtī vṛtti*), 40, 41
*saṁgraha* (a *sandhyaṅga*), 23-24, 32
*saṁkṣiptikā* (*saṃkṣipti*) (a variety of *ārabhaṭī vṛtti*), 41
*saṁhāra* (*upasaṁhāra*), 28, 30
*saṁlāpa* (a type of *sāttavatī vṛtti*), 40
*sampheṭa* (a *sandhyaṅga*), 26-27
*saṁśaya* (a *lakṣaṇa*), 49
*saṁsphoṭa* (a variety of *ārabhaṭī vṛtti*), 41-42
*saṁsthāpaka*, see *sthāpaka*
*saṁvaraṇa* (a *sandhyantara*), 57
*sañcārī bhāva*, 46
*sandhi*, xvii, xviii, 14-34
*sandhi* (a *sandhyaṅga*), 28-29, 33
*sandhyaṅgas*, xvii, xviii, 9
*sandhyantaras* (twenty-one), 56
*saṅkṣepa* (a *lakṣaṇa*), 49, 52
*śārdūlavikrīḍita*, xxi
*śarma* (a *sandhyaṅga*), 19-20
*sārūpya* (a *lakṣaṇa*), 49, 52
*saṭṭaka*, xi, 62
*sāttvatī vṛtti*, 39-40
*sarvaśrāvya* (type of *vastu*), 36
*śaurasenī*, 38
*siddhi* (a *lakṣaṇa*), 49, 51
*śobhā* (a *lakṣaṇa*), 49
*sprahā* (a *nāṭyālaṁkāra*), 52-53
*sragdharā*, xxi
*śṛṅgāra* (*rasa*), xvi, xvii, 31, 39, 46 (as *aṅgī* in *nāṭaka*), 47, 57 (as *aṇgī* in *prakaraṇa*), 58 (in *bhāṇa* type of play), 59 (its absence in *ḍima* and *vyāyoga* types of play), 60 (its prominence in *vīthī* type of play)
*sthāpaka*, xiii (fn), xiv, 2-5
*sthāyī bhāva*, 46
*sthitapāthya* (a *lāsyaṅga*), 55
*sūcya* (*vastu*), 9, 34, 47
*sūtradhāra*/*sūtrī*, xiii, xiii (fn), xiv, xix, 2-4, 38


*toṭaka* (a *sandhyaṅga*), 23-24, 32, 62
*trigata* (a *vīthyaṅga*), 42, 44
*trigūḍha* (a *lāsyaṅga*), 55-56
*tripatākā* (*hasta*), 37
*troṭaka*, xi
*tulyatarka* (a *lakṣaṇa*), 49-50

*udāharaṇa* (a *sandhyaṅga*), 23
*udbheda*, 16, 18, 32-33

*udghātyaka* (a *vīthyaṅga*), 42-43, 60
*udyama* (a *nāṭyālaṁkāra*), 52-53
*udvega* (a *sandhyaṅga*), 23-24
*ullekha* (a *nāṭyālaṁkāra*), 52, 54
*upadeśa/upadeśana* (a *nāṭyālaṁkāra*), 52, 54
*upadiṣṭa* (a *lakṣaṇa*), 49-50
*upagūhana* (a *sandhyaṅga*), 28, 30
*upakṣepa*, 16, 33
*upanyāsa* (a *sandhyaṅga*), 19, 21, 32
*upapatti* (a *nāṭyālaṁkāra*), 52-53
*upāya*, xix
*upasaṁhāra* (a *sandhyaṅga*), 28
*upasaṁhṛti* (a variety of *avasthā*), 15
*uktapratyukta* (a *lāsyaṅga*), 55-56
*utkīrtana* (a *nāṭyālaṁkāra*), 52, 54
*utpādya* (type of plot), 8-9, 57
*utprāsana* (a *nāṭyālaṁkāra*), 52-53
*utsṛṣṭikāṅka*, 57, 60
*uttamottamaka* (a *lāsyaṅga*), 55-56
*uttejana* (a *nāṭyālaṁkāra*), 52, 54
*utthāpaka/utthāpana* (a type of *sāttavtī vṛtti*), 40-41
*utthāpana* (*nā*), xv, 4

*vācyaprapañca*, 37
*vadha* (a *sandhyantara*), 56-57
*vajra* (a *sandhyaṅga*), 19, 21, 32
*vākkelī* (a *vīthyaṅga*), 42, 44
*varṇasaṁhāra* (a *sandhyaṅga*), 19, 22, 32
*vastūtthāpana* (a variety of *ārabhaṭī vṛtti*), 41-42
*vastuvibhāga*, 9
*vibhāva*, 46
*vibodha* (a *sandhyaṅga*), 28-29
*vicāra* (a *lakṣaṇa*), 49-50
*vichalana* (a *sandhyaṅga*), 26, 28
*vidhāna*, 16, 18
*vidhūta* (a *sandhyaṅga*), 19-20
*vidrava* (a *sandhyaṅga*), 26
*vidūṣaka*, xviii
*viṭa*, 19
*vilobhana* (a *sandhyaṅga*) 16-17, 33
*vimarśa* (*sandhi*), see *avamarśa*
*viparyaya* (a *lakṣaṇa*), 49, 51
*vīra* (*rasa*), xvi, xvii, xviii, 31, 39, 46 (as *aṅgī* in *nāṭaka*), 47, 58 (in *bhāṇa* type of play), 59-60 (as *aṅgī* in *samavakāra* type of play)
*virodhana* (a *sandhyaṅga*), 26-27, 33
*visarpa* (a *nāṭyālaṁkāra*), 52-53
*viśeṣaṇa* (a *lakṣaṇa*), 49, 51
*viṣkambhaka*, xix, xxi, 34-35, 47
*viṣkambhaka* (in *Abhirāmamaṇi*), 47
*vīthī* (type of play), 7, 56, 58 (as mixed with *prahasana*), 60
*vīthyaṅgas*, 5, 7, 42-46, 48 (thirteen), 60 (in *samavakāra* and *vīthī* types of play)
*vṛtti*(s), 60 (in *samavakāra* type of play)
*vyāhāra*, a component of *bhāratī vṛtti/āmukha*, 42, 45
*vyāyoga*, 60
*vyavasāya* (a *sandhyaṅga*) 26-27

*yācñā* (a *nāṭyālaṁkāra*), 52, 54
*yukti* (a *sandhyaṅga*), 16-17, 33
*yukti* (a *nāṭyālaṁkāra*), 52, 54



# NĀṬYAPRADĪPA

## of Sundaramiśra

Editor

**Radhavallabh Tripathi**

राष्ट्रीय पाण्डुलिपि मिशन
॥ विज्ञानमुपास्व ॥
National Mission for Manuscripts